CC-0. Digitized by eGangotri and MIDF- Delhi

मित्रसङ्गमं नाटकम्

जयतु संस्कृतम्
केन्द्रीयकार्यालयः, काष्ठमण्डपः, नेपालः
दूरभाषः ०१-५७०५३७१

रचनाकारः
आचार्यः खेमराजकेशवशरणः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Saṃskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् इति संस्थायाः द्वात्रिंशत्तमं (३२) प्रकाशनम्

मित्रसङ्गमम् नाटकम्

रचनाकारः
आचार्यः खेमराजकेशवशरणः

प्रकाशकम्
जयतु संस्कृतम्
नेपालः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुस्तकस्य नाम	:	**मित्रसङ्गमम् नाटकम्**
रचनाकारः	:	प्रा.आचार्यः खेमराजकेशवशरणः
प्रकाशकम्	:	जयतु संस्कृतम्, नेपालः ।
प्रकाशनमितिः	:	२०८२ वैक्रमाब्दस्य आषाढमासस्यद्वादशदिवसे (नेपाले समायोजितस्य एकोनविंशविश्वसंस्कृत-सम्मेलनस्यावसरे प्रकाशितम्)
प्रकाशनप्रति	:	पञ्चशतम्
सर्वाधिकारः	:	रचनाकारे
मुद्रकः	:	किशोर अफसेट प्रेस प्रा. लि.
कम्प्युटर	:	गणेशलम्सालः
मूल्यम्	:	३००।-
ISBN	:	978-9937-9902-3-3

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकाशकीयम्

नेपाले २००४ तमे विक्रमवर्षे एकतन्त्रीयस्य राणाशासनस्य विरोधे सर्वश्रीकस्य पूर्णप्रसादब्राह्मणस्य विमर्शे श्रीभद्रशर्म-राजेश्वरदेवकोटा-कमलराजरेग्मी-पद्मराजाधिकारि-काशीनाथ-गौतमानां नेतृत्वे सञ्चालितं जयतु संस्कृतमिति नामकम् आन्दोलनं नेपालस्य शैक्षिकराजनैतिकेतिहासे महत्त्वपूर्णं स्थानं रक्षति। २०५४ तमे विक्रमसम्वत्सरे तेन आन्दोलनेन स्वस्य पञ्चाशत्तमवर्षस्योपलक्ष्ये स्वर्णमहोत्सवस्यायोजनां विधाय २०५५ विक्रमसंवत्सरे तदान्दोलनं जयतु संस्कृतमिति संस्थायां रूपान्तरयित्वा अस्याः स्मरणे तीनधारापाकशालायाश्छात्रावासस्य वा अग्रे स्मारकस्तम्भः स्थापितः।

तस्यां संस्थायां रूपान्तरितायां सत्यामनया प्राच्यभाषाधर्मसंस्कृति-परम्परामूल्यमान्यतानां संरक्षणसंवर्द्धने प्रचारश्च स्वस्याः प्रमुखमभियानं लक्ष्यीकृतम्। अथ च संस्कृतस्य लोकप्रियतां वर्धयितुं तस्य पठनपाठनयोः प्रक्रियां व्यापिकां सम्पादयितुं संस्कृतग्रन्थानां नेपाल्यां भाषान्तरेषु च अनुवादकार्यक्रमः कल्पितः। अनूदितानां प्रकाशनं संस्कृतस्य प्रचारप्रसारौ च कल्पितौ। नेपाल्याः संस्कृतेः सभ्यतायाश्च संरक्षणं तदर्थं गोष्ठी-प्रशिक्षण-कार्याशालानां सञ्चालनमित्येतादृशाः कार्यक्रमा आयोज्यमानाः सन्त्यनया।

अस्याः संस्थायाः प्रयासे नेपालस्य नेपालसर्वकारस्य च पुराणतमे समाचारप्रकाशने गोरखापत्रे दैनिके प्रतिमासं संस्कृतपत्रद्वयं २०७२ विक्रमवर्षस्य आषाढमासस्य प्रथमदिनतः (जयतु संस्कृतं इति दिवसतः) पाक्षिकरूपेण प्रकाश्यमानं भजते। एवमेव जयतु संस्कृतमिति संस्थायाः प्रयासे २०७५ भाद्रस्य षष्ठगतदिनतो नेपालटेलिभिजनतः (नेपालदूरदर्शनतः) संस्कृतसमाचाराः प्रसार्यमाणाः विलसन्ति। लोकसेवाऽऽयोगे संस्कृतपत्रमेकं रक्षणीयमिति प्रयासे सर्वाणि पत्राणि साधारणानि कृतानि सन्ति। नेपालप्रज्ञाप्रतिष्ठाने संस्कृतविभाग-सञ्चालने, नेपालस्य मुक्तविश्वविद्यालये अन्येषु विश्वविद्यालयेषु च संस्कृतस्य विषयविभागान् स्थापयितुं प्रयासाः जायममानाः सन्ति। द्वन्द्वकाले पिहितद्वाराणां संस्कृतमाध्यमिकविद्यालयानां पुनःस्थापनायै संस्कृतगुरुकुलानां सुदृढतायै संस्थेयं सक्रिया वर्तते। उत्तरमहाभारतग्रन्थलेखने, संस्कृते मौलिकग्रन्थानां लेखने, तत्र प्रेरणाप्रदाने संस्थेयं सदा जागरुका अस्ति। संस्कृतनाटकानां लेखने तन्मञ्चने च संस्थेयं कार्यं कुर्वाणा वर्तते।

मौलिकस्य संस्कृतग्रन्थस्य प्रकाशितस्य च मूल्याङ्कनं विधाय तदाधारेण जयतु संस्कृतम् इति पुरस्कारेण अद्य पर्यन्तं षोडश विद्वांसः पुरस्कृताः सन्ति। १. पं. भीमकान्तपन्थी (२०५६) जगदम्बिकावैभवं (महाकाव्यम्) २. पं.धनञ्जयमरासिनी

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

(२०५७, हरिहरप्रार्थनापुष्पाञ्जलिः, संस्कृतकाव्यम्), ३. डा.हरिहरशर्म-अर्यालः (२०५९, संस्कृकाव्यत्रिवेणी), ४. प्रा.डा. माधवभट्टराई (२०५८), सत्यशाइ-चरितं महाकाव्यम्), ५. प्रा.डा.वेणीमाधवढकालः (२०६०) लिच्छविकालिकाना-मभिलेखानां साहित्यिकं परिशीलनम्), ६. भैषज्यः गोपालवैद्यः किंजल्कः (२०६१ हिमाद्रिमहिमा काव्यम्), ७. डा.लक्ष्मीकान्तपन्थी (२०६३ ऋतुविचार-सानुवादः) ८. प्रा.डा. टीकाराम अधिकारी (२०६५, पद्यपुष्पाञ्जलिः), ९. पं. लोकनाथलुइँटेलः (२०६६, श्रीरामशरणं मम, काव्यम्), १०. प्रा.रोहिणीवल्लभपोखेलः (२०६७ भावावर्तः काव्यकविता), ११. प्रा. टीकादत्तबरालः, (२०६८, तत्सम नेपाली व्युत्पत्ति शब्दकोश), १२. प्रा.डा. विष्णुराज-आत्रेयः (२०७१ हनुमदयन-महाकाव्यम्), १३. प्रा. रामहरिदाहालः (२०७३, गतो मदीयो ननु कुत्र देशः, अमरभारतीगौरवम्), १४. डा. लक्ष्मीकान्त पन्थी (२०७५ काव्यमालिका (कविता, ५ खण्डकाव्यञ्च ४००० श्लोकाः), १५. प्रा. नीलमणिढुङ्गाना, (२०७८, व्युत्पत्तिमूलक संस्कृत नेपाली शब्दकोश ०८१।५।७), १६. आचार्य पूर्णचन्द्रढुङ्गेल, २०७९, देवाधिदेवमहादेवश्रीनीलकण्ठमहाकाव्यम् ०८१।५।७)

संस्कृतवाङ्मयस्य सेवाया आधारेण च संस्कृतविद्वांसो जयतु संस्कृतम् इति सम्मानेन सम्मानिताः सन्ति। तत्र सम्मानिताः विद्वांसः सन्ति- डा. स्वामी प्रपन्नाचार्यः (२०६९ फाल्गुनः), तदनु च विविधोपाधिना सह विद्वांसः सम्मानिताः। २०७२ वैक्रमाब्दस्य आषाढस्य १ दिनाङ्के आचार्यः प्रा.खेमराजकेशवशरणः (प्रवचनशिरोमणिः), प्रा.डा. वेणीमाधवढकालः (संस्कृतविद्याशिरोमणिः) सम्मानितौ। खेमराजकेशवशरणः काष्ठमण्डपं समागन्तुमशक्यत्वात् सचिवो नवराजकट्टेलः, उपाध्यक्षो विष्णुप्रसाददेवकोटा च देवघट्टे गत्वा सम्मानं कृतवन्तौ। २०७६ वैक्रमाब्दस्य फाल्गुनमासे प्रा. विद्यानाथोपाध्यायः (तन्त्रन्यायविद्याकेशरिः), शरत्कुमारभट्टराई (वेदान्तशिरोमणिः), प्रा. शिवगोपालरिसालः (वेदान्तविद्याकेशरिः), प्रा.पुरुषोत्तमभट्टराई (न्यायविद्याकेशरिः) च सम्मानिताः। २०८१ वैक्रमाब्दस्य भाद्रमासस्य ७ दिनाङ्के विद्वांसो सम्मानिताः, ते यथा प्रा.डा. ऋषिरामपोखरेलः (वेदविद्याशिरोमणिः), प्रा.डा. दीर्घराजघिमिरे (न्यायवेदान्तकेशरिः), प्रा.डा. रामचन्द्रगौतमः (धर्मशास्त्रविशारदः), प्रा.डा. गोविन्दचौधरी (न्यायविद्याकेशरिः), प्रा. चेतोनाथ-आचार्यः (प्रमाणशास्त्रविशारदः) इति।

जयतु संस्कृतमिति संस्थयैव थाइल्याण्डदेशे २०१५ तमे ईशवीयवर्षे षोडशतमे विश्वसंस्कृतसम्मेलने जाते नेपालेऽपि संस्कृतसम्मेलनमेतादृशं स्यादिति प्रतिनिधिद्वारा पत्रं सम्प्रेष्य कृतेऽनुरोधे सा प्रक्रिया अग्रे गता वर्तते। एतादृशस्य सम्मेलनस्य आयोजकेन सर्वकारीयेण विश्वविद्यालयेन भाव्यमिति व्यवस्थायाः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सत्त्वात् पुनः जयतु संस्कृतम् इति संस्थया नेपालसंस्कृतविश्वविद्यालयः समनुरुद्धः। तदनुसारेण विश्वविद्यालयेन सर्वापि प्रक्रिया अग्रे सारिता, तदनुसारं वैक्रमाब्दस्य २०७५ आषाढमासे क्यानाडादेशस्य भ्यानकुवरमहानगरे सम्पन्ने विश्वसंस्कृतसम्मेलने नेपालस्य प्रस्तावः स्वीकृतः। अथ च २०१८ खीष्टाब्दे अत्र सम्मेलनं सञ्जातञ्चेत् तेन २०२४ तमे खीष्टाब्दे नेपाले तत्सम्मेलनं भविष्यतीति घोषितमासीत्। तदनु नेपालसंस्कृत-विश्वविद्यालयेन विश्वसंस्कृतसम्मेलनस्य नेपाले सम्पादनाय एका संयोजनसमितिश्च सङ्घटितासीत्। संस्कृतविश्वविद्यालयेन व्यवस्थापने विलम्बो विहितः। अतः प्रयासानन्तरेण २०८२ वैक्रमाब्दस्य ज्येष्ठमासस्य १२-१६ (सन् २०२५ खीष्टाब्दस्य जुन २६-३०) विश्वसंस्कृतसम्मेलनो जायमानोऽस्ति।

भाषाऽऽयोगस्य पाठ्यक्रमविकासकेन्द्रस्य च ध्यानाकर्षणं संस्कृतसम्बन्धे कृतमस्ति। संस्थयानया संस्कृतलोकभाषाभियानमपि सञ्चालितम्। राष्ट्रियजनगणनायां संस्कृतमातृभाषाभियानञ्चाग्रे सारितम्। उच्चस्तरीयाय राष्ट्रियशिक्षाऽऽयोगाय (वि.सं २०७५) चास्माभिः महत्त्वपूर्णाः परामर्शाः दत्ताः। तत्रास्माभिः प्रत्तान् अनेकान् परामर्शान् स्वीकृत्य आयोगस्य प्रतिवेदनस्य २०-२१ अध्याये ते समाविष्टाः। एवञ्च साधारणशिक्षायां प्रथमकक्षातोऽष्टमकक्षापर्यन्तं संस्कृतपत्रस्य सन्निवेशाय अनया संस्थया महान् प्रयासः कृतः।

नेपालेऽनया संस्थया संस्कृतलोकभाषाभियानं सञ्चालितम्। २०७६ वैक्रमाब्दे कोभिड-१९ व्याधिकारणेन संसारोऽवरुद्धः। वयं नेपालिनश्च स्वस्यैव गृहे पिनद्धाः। तदवसरे अनया संस्थया सप्तैव प्रदेशेषु (२०७७ वैक्रमाब्दे) 'नेपालस्य साधारणशिक्षायां संस्कृतस्य आवश्यकता' इति विषये जूमगोष्ठी विहिता। तदनु सप्तैव प्रदेशेषु (२०७७-२०७८) पञ्चदशदिवस-संस्कृतभाषाप्रशिक्षणं विहितम्। सहस्रशो जनैः प्रशिक्षणे भागो गृहीतः। तदैव संस्कृतलोकभाषाभियानस्य महत्त्वं स्थापितम्। एवञ्च २०७८ वैक्रमाब्दां सम्पन्नायां राष्ट्रियजनगणनायां १४९०० जनताभिः संस्कृतं मम मातृभाषा इति पञ्जीकृतम्। ६००० सहस्रेण जनताभिः संस्कृतं मम द्वितीया भाषा इति, १,३५,००० जनताभिः संस्कृतं मम पूर्वजानां भाषा इति पञ्जीकृतमस्ति। नेपाले १२४ भाषा पञ्जीकृताः सन्ति तेषु संस्कृतभाषायाः क्रमः ५६ अङ्केऽस्ति। अनेन प्रयासेन अधुना संस्कृतं नेपालस्य राष्ट्रियभाषासु स्थापितं वर्तते।यतु संस्कृतम् २०५५ इति संस्थायाः संस्थापनापश्चात् आजीवनसदस्यो भूत्वा अस्याः संस्थायाः सक्रियतापूर्वकं सञ्चालने चास्य महनीया स्पृहणीया च भूमिकास्ति। जयतु संस्कृतम् इति संस्था नेपाले संस्कृतस्य संस्कृतशिक्षायाः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संरक्षणाय विकासाय, प्रचाराय प्रसाराय च उल्लेखनीयं कार्यं कुर्वाण अग्रे गच्छन्ती वर्तते नेपालस्य संस्कृतप्रेमिणः जानन्त्येव ।

नेपालिभाषायां कविता, खण्डकाव्यं, एकाङ्की, समालोचना, लेखाः, रचनादयश्च प्रकाशिताः प्रकाश्यमानाश्च विद्यन्ते । तद्वद् दाहालस्य संस्कृतभाषायामपि कविता, खण्डकाव्यानि, रूपकाणि, लेखाः, समीक्षाश्च प्रकाशिताः प्रकाश्यमानाश्च सन्ति ।

जयतु संस्कृतम् इति संस्था न केवलं रूपकरचनायां प्रकाशने च संलग्ना अपितु संस्कृतनाटकप्रदर्शने च कृतभूरिपरिश्रमशीलास्ति । रूपकाणां प्रकाशानन्तरं रङ्गमञ्चे नाटकप्रदर्शनस्य व्यवस्थायै च प्रयत्ना जायमाना सन्ति । प्रकाशितेषु रूपकेषु संस्कृतनाटकमहोत्सवस्यैव आयोजनां कर्तुमस्माकं प्रयत्नो भविष्यति । संस्कृतनाटकमञ्चनस्य प्रतियोगिताञ्च सञ्चालयितुं शक्यते । पारितोषिकस्य व्यवस्थाञ्च अग्रे सारयितुं पार्यते । संस्कृतनाटकरचनाकारेभ्यः प्रोत्साहनस्य पारितोषिकस्य नाटकप्रकाशनस्य च योजना तु पूर्वमेव घोषिता एव । अस्य कृते प्रा.रामहरिदाहालः लक्ष्याधिकानि रूप्यकाणि प्रदाय जयतु संस्कृतम् नाट्यपुरस्कारस्थापनाय अस्मान् प्रेरितवान् आसीत् । तदनु द्विलक्षराशियुतस्य नाट्यपुरस्कारस्य स्थापना च विहितास्ति । संस्कृतग्रन्थरचनायां ग्रन्थानुवादे च प्रा.डा. नवराजकट्टेलवेरण च ग्रन्थरचनानुवादपुरस्कारः स्थापितोऽस्ति ।

एवमेव नेपालस्य संस्कृतविदुष्यः संस्कृतरचनायमग्रे आगच्छन्तु इति धिया तासां प्रोत्साहनाय, जागरणाय च जयतु संस्कृतम् इति संस्था पृथगेव पुरस्कारस्य व्यवस्थायै चिन्तनशीलाऽस्ति । अस्य कृते अक्षयकोषस्य स्थापनायै मनस्विनां दातृणामन्वेषणं क्रियमाणमस्ति । अस्य कृते जयतु संस्कृतम् इति संस्थायाः निवर्तमानसदस्या श्रीमती विद्याकुमारीवज्राचार्या नारीपुरस्कारस्य कृते अक्षयकोशस्थापनाय एकलक्षं द्रव्याणि दत्वा नारीप्रतिभायाः विकासाय संस्कृचरनायां ताः प्रोत्साहनाय नारीप्रतिभापुरस्कारं स्थापितवती । एवमेव काष्ठमण्डपवास्तव्या श्रीमती-इन्दिरासापकोटा च एकलक्षं द्रव्याणि दत्वा उद्यमशालिनी-महिलाप्रतिभापुरस्कारश्चस्थापितवती ।

तस्य यथोचितव्यवस्था च विहितास्ति । नेपाल- संस्कृत विश्वविद्यालयस्य शैक्षिकसेवायामनेकाः विदुष्यः सन्ति परन्तु ते काव्यकृतिरचनायां नैव प्रवृत्ताः सन्ति । अतस्ता अपि संस्कृतस्य रचनायां संस्कृतस्य विकासाय विस्ताराय च प्रवृत्ताः भवेयुरिति जयतु संस्कृतमिति संस्थाया अभ्यर्थनास्ति ।

अनया संस्थया ग्रन्थानुवादः प्रकाशनयोजना च स्वकीयस्य उद्देश्यस्य मूलाधारे समाविष्टास्ति । तदनुसारं पूर्वकार्यसमित्या निवर्तमानेन चाध्यक्षेण प्राध्यापकेन

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विद्यानाथोपाध्यायेन संस्कृतभाषायां निबद्धानां दार्शनिकग्रन्थानामनुवादः प्रकाशनपरियोजनाचाग्रे सारितासीत्। तस्याः योजनायाः निरन्तरताधुनापि अग्रे प्रवर्द्धमाना एवास्ति। तदनुसारं वेदान्त-न्याय-मीमांसा-तन्त्र-जैन-बौद्ध-दर्शनानामनुवादः प्रकाशनञ्च विहितमस्ति।

संस्कृतभाषायां रचितानां मौलिकग्रन्थानां काव्य-नाटक-कथा-निबन्धादिग्रन्थानां सङ्कलनं, सम्पादनं, प्रकाशनञ्च कुर्वन् अग्रे गन्तव्यमिति संस्थायाः महदुद्देश्यं वरीवर्ति। आवश्यकतानुसारेण सामर्थ्यानुसारेण च ग्रन्थनिर्माण-प्रकाशनानुसन्धानादि-कार्याणि च जायन्त एव।

अनया संस्थया नैरन्तर्येण संस्कृतलोकभाषाभियानं सञ्चालितं, सञ्चालयिष्यते च। तस्य कृतेऽनेका गोष्ठ्यः कृताः, करिष्यन्ते च। संस्कृतसम्भाषणशिविराणि सञ्चालितानि, सञ्चालयिष्यते च। सञ्चारमाध्यमेषु संस्कृतस्य प्रचारप्रसारौ कृतौ, करिष्येते च। अस्याभियानस्य अभिन्नाङ्गत्वेन संस्कृतरूपकसङ्ग्रह-ग्रन्थसम्पादनाय रूपकानां सङ्कलनस्य, प्रकाशनस्य च योजना विहिता। तदनुसारेण अनेकानि रूपकाणि सङ्कलितानि, अस्याभियानस्य क्रमे प्रा. डा. नवराजकट्टेलवरेण स्वकीयानां लघुरूपकाणां लेखनं सम्पादनकार्यञ्च कृत्वा 'कर्मफलम्' इति संस्कृतरूपकसङ्ग्रहः प्रकाशितश्च। एवमेव अनेकेषां रचनाकाराणां सङ्कलनं, सम्पादनं विहाय संस्कृतनाटिकाकौस्तुभः (लघुरूपकसङ्ग्रहः) प्रकाशितश्च।

अस्य नाटकस्य रचयिता प्राध्यापकः खेमराजकेशवशरणो वर्तते। तस्य जन्म १९९४ वैक्रमाब्दस्य कार्तिकमासस्य २५ दिनाङ्के, जाँतेग्रामस्य ३ वडा, सामलिङ्ग-लेटाङ्गे मोरङजनपदे, द्रुपदादेवी-तारानिधिदाहालयोः पुत्ररत्नत्वेन वत्सगोत्रीय-ब्राह्मणकुले समभवत्। अस्य पत्नी शारदादेवी अस्ति। व्रजेश्वरी-योगेश्वरीपुत्र्यौ, मोहन-गिरिधरौ द्वौ पुत्रौ स्तः। असौ २०७४ तमस्य वैक्रमाब्दस्य श्रावणस्य १९ दिनाङ्के उपाधिचिह्नं परित्यज्य पञ्चत्वङ्गतः।

अनेन विदुषा भारतस्य बंगालसंस्कृतशिक्षापरिषदः व्याकरणतीर्थमं २०१५ वैक्रमाब्दे समुत्तीर्णः। तदनु वाराणसेयसंस्कृतविश्वविद्यालयतः २०१७ वैक्रमाब्दे साहित्याचार्यो विहितः। त्रिभुवनविश्वविद्यालयत आङ्ग्लसाहित्ये २०२१ तमे वैक्रमाब्दे स्नातकश्च विहितः।

अनेन विदुषा वैक्रमाब्दस्य २०१९ तः २०२४ पर्यन्तं भारतस्य निम्बार्कसंस्कृतमहाविद्यालये संपाठितम्। तदनु चायं २०२४ वैक्रमाब्दतः काष्ठमण्डपं समागत्य २०५१ पर्यन्तं वाल्मीकिविद्यापीठे साहित्यविषयमपाठयत्।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अयं सूरिः बहुभाषाविज्ञः आसीत्। अयं नेपाली-हिन्दी-अंग्रेजी-मराठी-बङ्गाली-मारवाडीभाषासु वक्तुं लेखितुञ्च शक्नोति स्म।

सामाजिकधार्मिकसेवायाञ्च स बहुवर्षं संलग्नो जातः। सनातनधर्मसंस्कृतेः संस्थापकमहासचिवो भूत्वा (२०२३-२०३७) चानेन कार्यमकारि। अस्यामेव समित्यां अध्यक्षो भूत्वा (२०३७-२०५१) सनातनधर्मप्रचारं कृतवान्। सामाजिकसेवासमन्वयसमित्यन्तर्गतस्य हिन्दूधर्मसमन्वयसमितेः सभापतिर्भूत्वा, राष्ट्रियान्ताराष्ट्रियानां शरणागतिप्रतिष्ठानानां अध्यक्षः संरक्षको वा भूत्वा अनेनानेकानि कार्याणि व्यधायि। शताधिकानि भागवतप्रवचनानि विधाय धर्मस्य दर्शनस्य सनातनाचारविचारस्य च प्रचारो विहितः। ६०–७० अधिकेषु देशेषु परिभ्रम्य धार्मिकं, दार्शनिकं प्रवचनञ्चायं सूरिः कृतवान्।

अचार्यवरेण अनेकानि परितोषिकाणि सम्प्राप्तानि सन्ति। गोरखादक्षिणबाहुः तृतीयः(२०३९), गुणराजपुरस्कारः (२०३७), छात्रजीवने विभिन्नासु प्रतियोगितासु प्राप्तानि अनेकानि १५० अधिकानि पदकानि सन्ति। सनातनधर्मसंरक्षिणीसभा-आसामद्वारा (२०३७ वर्षे) अचार्यपदं दत्तमस्ति। हिन्दुमन्दिर-डिसी-संयुक्त-अमेरिकाद्वारा २०५० तमे वैक्रमाब्दे सन्तशिरोमणिपदेनायं विभूषितः। अस्य विदुषः सम्माने नेपाले विदेशे च अनेकाभिः संस्थाभिः ५०० अधिकानि अभिनन्दनानि विहितानि सन्ति। एवञ्च अभिनन्दनग्रन्थप्रकाशनपूर्वकं २०६८ कार्तिकमासस्य २५ दिनाङ्के बृहद्राष्ट्रियाभिनन्दनसमारोहस्य आयोजनां विधाय सोऽयं सूरिः समभिनन्दितश्च।

आचार्यखेमराजकेशवशरणः अनेकानि ग्रन्थरत्नानि रचयामास। अधुनापर्यन्तमस्य ४३ अधिकानि पुस्तकानि प्रकाशितानि विद्यन्ते। तेषु पुस्तकेषु गोहत्यानिषेधः (संस्कृतलघुकाव्यम् २०१४), महेन्द्रपञ्चविंशतिः (संस्कृतलघुकाव्यम् २०२०), हर्षचरितम् (नेपालीरूपान्तरणम् २०२४), सत्यदर्शन (२०३१, निबन्धसङ्ग्रह), आवाहन (२०३६, कवितासङ्ग्रहः) मातृवन्दना (२०४४, संस्कृते राष्ट्रवन्दना), मृत्युपारिको जीवनयात्रा २०४८, खण्डकाव्य), मित्रसङ्गमम् (रचना २०३३, संस्कृतनाटकम्), नेपालगौरवम् (२०५३ संस्कृतकाव्यम्), देवघट्टवैभवम् (२०५४, संस्कृतलघुकाव्यम्), परमानन्दस्मृति (२०५४, नेपाली शोककाव्य) विश्वशान्तिगीतिकाष्टमम् (२०५५, संस्कृतगीतसङ्ग्रहः), पावनताको राजमार्ग (२०५९, नेपाली खण्डकाव्य), राष्ट्रनिर्माताप्रति श्रद्धासुमन (२०५९, नेपाली खण्डकाव्यम), मानवता (२०६३, नेपाली महाकाव्य) सूक्तिसुधा (२०६३, संस्कृतनीतिकाव्यम्) इत्यादीनि ग्रन्थरत्नानि प्रकाशितानि सन्ति। अनेके च

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ग्रन्थाः प्रकाशनस्य प्रतीक्षायां सन्ति यथा - जीवन एक तीर्थयात्रा (महाकाव्य), जीवन शिक्षा (महाकाव्य) इति ।

नाट्यसाहित्यस्य विकासाय संस्थया भूरिपरिश्रमः कृतः । नाटकानि एकाङ्कनाटकानि च सङ्कलितानि । तेषां सङ्कलने भूरिश्रमः कुर्वाणः संस्थायाः सदस्यसचिवः प्रा.डा. नवराजकट्टेलोऽपि धन्यवादार्हः, अस्यैव सदस्यसचिवस्य सक्रियतायां नाटकानां लेखनं, सङ्कलनं, सम्पादनं, प्रकाशनञ्च सम्भवम्, अनेनैव विदुषा पौनःपुन्यं निगद्य रचनाः सङ्कलिताः । एतन्नाटकं प्रदाय सहयोगकारिणे अस्मन्मित्राय डा. कृष्णप्रसादभट्टराईमहोदयाय हार्दं धन्यवादं व्याहरामि । नाटकं विलोक्य संशोधने परिश्रमशीलो रामप्रसादपौडेलः, कम्प्युटरयन्त्रे टङ्कणं विधाय संशोधने च संलग्नो गणेशलम्सालश्च प्रशंसनीयौ स्तः । एवञ्चास्य नाटकस्य प्रकाशनाय संयोजिताः अन्ये च संस्कृतप्रयिणः धन्यवादार्हाः सन्ति । जयतु संस्कृतम् ।

अध्यक्षः

डा. बद्रीपोखेलः

जयतु संस्कृतम्

अनामनगरम्, काष्ठमण्डपम् - ३२ ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कृतज्ञोऽस्मि

नाटकमिदं ममेष्टस्मृतेरङ्गभूतम्। स्वान्तःसुखैकसाधनतयेदमहं व्यरौरचम्। प्राकाश्यं नीयमानमिदं समीक्ष्य विशालहृयदयैर्वस्तुतो गुरुतां दधानैर्गुरुजनैर्ये खल्वाशिषामुद्गाराः प्रकटितास्तेषां कृते चिरकृतज्ञोऽस्मि। गीर्वाणवाणी खल्वार्यसंस्कृतेः शेवधिमन्तर्भाव्य विराजते। कारुण्यमेव सर्वरससारभूतं मन्वानानां कविवराणां हार्दं सन्देशं मुखरयन्ती संस्कृत-सरस्वती अधुनापि विश्वजनीनसमादरभाजनतां समुद्वहतीति तथ्यं मया पाश्चात्त्यदेशेषु सञ्चाल्यमानानां संस्कृतानुसन्धानसम्बद्धानां क्रियाकलापानां दर्शनेनानुभूतम्। समर्था असमर्थान्, सधनाश्च निर्धनान् प्रति कारुण्यसंवेदनां दधानास्तेषां समुत्थानाय दत्तावधाना भवेयुरिति शाश्वती मानवसमाजस्य अपेक्षा। श्रीकृष्णसुदामसङ्गमप्रसङ्गमधिकृत्य विरचितं नाटकमिदं मूलतया तामिमामेव संवेदनां समुद्भाव्य प्रवर्तमानमिति भरतवाक्यगतैर्भावैः प्राकाश्यं यास्यति।

लघीयस्यपि अस्मिन् प्रयत्ने बहुश्रेयो दत्तवद्भ्यः परमोदारेभ्यो विद्वत्तल्लजेभ्यो भूमिकाकारेभ्यो डा.वासुदेवत्रिपाठीमहाभागेभ्यः, सम्मतिदातृभ्यो महेन्द्रसंस्कृतविश्वविद्यालयोपकुलपतिपदमलङ्कुर्वाणेभ्यःप्राध्यापकचूडानाथभट्टराय महाभागेभ्यः, लालबहादुरशास्त्रिकेन्द्रीयसंस्कृतविद्यापीठोपकुलपतिपदमधिष्ठितेभ्यो डा. मण्डनमिश्रमहोदयेभ्यः सविशेषमाभारं विज्ञापयामि। राजस्थानशिक्षानिर्देशकान् श्रीदेवर्षिकलानाथशास्त्रिमहाभागाञ्छ्रद्धास्पदीभूतान् डा. स्वामिप्रपन्नाचार्यचरणांश्च कृतज्ञहृदयेन संस्मरामि। कविभरतराजशर्ममन्थलीयेभ्यः कविभरतराजपन्तमहाशयेभ्यश्च सादरान् धन्यवादान् वितरामि। कृतिरियं सुरभारतीसमुपासकानां गुणग्राहिणां यावन्मनस्तोषयति तावत्स्वकीयां लेखनीं साफल्यभाजं मंस्ये।

विदुषां कवीनां च विधेयः
खेमराजकेशवशरणः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमोऽङ्कः

प्रथमं दृश्यम्

(प्रस्तावना)

सच्छ्रुत्यर्थनिवेद्यचिन्मयपरब्रह्मस्वरूपान्वितौ
दिव्यौ नित्यकिशोररूपरुचिरौ गोलोकधामेश्वरौ ।
भक्तानां प्रणयप्रकर्षममलं संवर्द्धयन्तौ सदा
श्रीराधामुरलीधरौ मम हृदि क्षेमङ्करौ स्तां सदा ॥

वेदान्तो यमशेषकारणतया व्याख्याति रात्रिन्दिवं
यस्मिन् भक्तिभृतोऽखिलस्य जगतः कल्याणमातन्वते ।
धर्मस्योन्नतये भवन्त्यनुयुगं यस्यावताराः शुभाः
सोऽसौ सर्वजगत्प्रभुर्विजयते श्रीरुक्मिणीवल्लभः ॥

(नान्द्यन्ते)

सूत्रधारः - (नर्तकीमभिलक्ष्य) अयि ! मम प्राणवल्लभे ! आमोदलतिके ! क्व गतासि ? कियतः कालात् त्वामेवाकारयन्नस्मि । न शृणोषि किम् ? शीघ्रमायाहि ।

नर्तकी – (नेपथ्ये) आर्यपुत्र ! श्रुतवत्यस्मि । किञ्चिदस्त्यवश्यकरणीयं गृहकृत्यम् । तत्समाप्य सत्वरमेष्यामि ।

सूत्रधारः - (स्वगतम्) विचित्रेयं जीवनरचना । कर्मणः कुत्रापि नास्ति समाप्तिः । बालोऽपि, युवापि, प्रौढोऽपि, वृद्धोऽपि, पुरुषोऽपि, नारी अपि सर्व एव कर्मणि व्यस्ताः । नास्ति कोऽपि सावकाशः । कीदृशमिदमविश्रान्तं कर्मजालम् ? (पुनः नर्तकीं प्रति) त्वरस्व भामिनि ! त्वरस्व । त्वामेव प्रतिनिमेषं प्रतीक्षमाणोऽस्मि ।

(नर्तकी प्रविशति)

नर्तकी - (निःश्वस्य) आर्यपुत्र ! अद्य भवान् महत्या त्वरया मामाकारयन्नस्ति । किमस्यास्त्वरायाः कारणम् ? किमपि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशिष्टं कार्यमापतितम् ? आज्ञापयतु आर्यपुत्रः किमस्ति मे करणीयम् ?

सूत्रधारः - (सोल्लासम्) प्रिये ! अद्य खलु मया महद्हर्षास्पदं वृत्तमधुनैव श्रुतम्। एकं नवीनतमं भावप्रवणं हृदयहारि नाटकमभिनेतव्यमिति ।

नर्तकी - (सौत्सुक्यम्) आर्यपुत्र ! नूनं नवीनोऽयं हर्षस्य विषयः। परं कतमतन्नाटकम् ? कस्तस्य रचयिता ? किं च तस्य नामधेयम् ? पुरातनमाधुनिकं वा विषयमधिकृत्य तद् रचितम् ? एतत् सर्वं कथय। एतत्सर्वं प्रथमं वेदितव्यं भवति। यतः

कर्तुः परिचयान्नूनं कृतेर्भवति पूर्णता ।
भिषङ्नाम्नौषधं यद्वल्लोके यात्यनवद्यताम् ॥

सूत्रधारः - साधु। समीचीनं भणसि। मम हृदयेश्वरि ! त्वमपि नूनं श्रुतवती भवेः। पुरातनविषयवस्तुघटितमपि नवीनतमं नाटकमेकमिदानीं जनचर्चामधिरूढमस्ति। "मित्रसङ्गम" मिति तस्य नामधेयम्। तस्य च रचयिता प्राच्यनेपालस्य मोरङ्गमण्डलवर्तिसाम्लिङग्रामाभिजनो वत्सकुलावतीर्णः कविः केशवशरणनामा खेमराजोपाध्यायः। सोऽसौ कविवरः स्वकीयामन्तरनुभूतिं विशदीकुर्वन् परमकारुणिकस्य भगवतो रुक्मिणीवल्लभस्य निष्कामप्रेमादर्शभूतस्य तन्मित्रस्य परमतपस्विनः सुदाम्नश्च सङ्गममधिकृत्य नाटकमिदं व्यरीरचत्। तदेवेदं नाटकमद्यास्माभिरभिनेतव्यमिति विद्वत्परिषदाऽदिष्टोऽस्मि। तत्साधय समस्तान् सम्भारान्, यतः–

हृदयस्यशिवृत्तायाः कृतेरस्त्यभिनेयता ।
तुष्टाः सहृदयाः सन्तु मात्रा काचित् त्रुटिर्भवेत् ॥

नर्तकी – (सहर्षम्) अस्तु तावत्। आर्यपुत्रस्याज्ञां शिरसि निधाय सर्वं साधयिष्यामि। विश्वजनीनविचारशीलस्य कवेः केशवशरणस्य भावप्रवणां नाट्यकृतिमिमामभिनयेन सफलियतुं पारिपार्श्विकमपि समाहूय सर्वामावश्यकीं व्यवस्थां सम्पादयिष्यामि (गच्छति)।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पारिपार्श्विकः – (प्रविश्य सूत्रधारं नमस्कृत्य) आर्य ! प्रणमामि। अद्य मित्रसङ्गमनामकमभिनवं नाटकमभिनेयमिति नर्तकीमुखान्मया श्रुतम्। तस्य च कृते यद्यत्सज्जीकरणीयं तज्ज्ञातुं तया भवत्सन्निधिं प्रेषितोऽस्मि। तदाज्ञापयतु भवान्।

सूत्रधारः – पारिपार्श्विक ! नाटकमिदमाकारदृष्ट्या लघु। परन्तु विषयवस्तुदृष्ट्या हृदयं स्पृशति। भावप्राधान्यमस्य सर्वस्वभूतम्। अतो विशेषव्यवस्था विधेया। अन्यान् साधनसम्भारान् नर्तकी सज्जीकरिष्यति। अभिनयविचक्षणान् कलाविशेषज्ञान् आकार्य तत्परामर्शेन त्वया मञ्चसज्जा सम्यक् सम्पादनीया। एतत् सर्वं शीघ्रं सम्पादनीयम्।

पारिपार्श्विकः – यदाज्ञापयति भवान् (गच्छति)।

सूत्रधारः - (किञ्चिद् विहस्य स्वगतम्)

यत्रास्ति विद्या न हि तत्र वैभवं
सम्पद्भूता चेतसि भावशून्यता।
असम्भवा किं सहगामिताऽनयोः ?
विडम्बनैषा कथमन्तमेष्यति ? ॥

(उपरि विलोक्य)

विधातः ! विचित्रा खलु तव रचना।

(गच्छति)

(पटक्षेपः)

द्वितीयं दृश्यम्

(स्थानम्-सुदाम्नः कुटीपरिसरः। इतस्ततो हरितहरिता वल्लर्यो वृक्षाश्च दृश्यन्ते। तन्मध्यवर्तिन्याः कुट्याः प्राङ्गणं परिमार्जयन्ती हस्ते गृहीतसम्मार्जनी सुशीला प्रविशति)।

सुशीला - (चिन्तितमुद्रया) आर्यपुत्रस्य भिक्षार्थं गतस्य अद्य दिनत्रयं जातम्। इदानीमपि नागच्छति। एतावान् विलम्बस्तु अद्यावधि नानुभूतः। किं जातम् ? वृष्ट्या वा मार्गोऽवरुद्धो भवेत्। किञ्चित्कारणान्तरं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वा समापतितं भवेत्। (नेपथ्ये बालस्वरः श्रूयते-"अम्ब ! अम्ब ! क्षुधा बाधते।" "अम्ब बुभुक्षा पीडयति।") हा ! किमहं करोमि? प्रतिसन्ध्यं, प्रतिप्रभातं बाला रुदन्ति। तेषां तु रोदनमेव बलम्। गतदिने प्रतिवेशिन्याः सकाशादानीतं मुष्टिद्वयमप्यद्यैव समाप्तिं गतम्। अद्य पुनः कुत्र याचिष्ये ? इयं याचना शल्यायते मम मनसि। कीदृशीयं दीनता समापतिता मम ? याचनाविवशाया ममेदं दिनत्रयं युगत्रयसमं सञ्जायमानमस्ति। किं करवाणि ?

दरिद्रते ! किं कुपितासि मां प्रति
व्यर्थं किमित्थं व्यथयस्यहर्निशम् ?।
विद्यातपोभ्यां न किमस्ति ते रुचिः
वरस्य पीडा किमतीव ते प्रिया ?॥

(नेपथ्ये पुनः "अम्ब ! क्षुधार्तोऽस्मि। अम्ब ! किमपि खादितुं देहि" इति बालध्वनिः श्रूयते। निटिले हस्तं विन्यस्य) हा धिक् ! कथं सान्त्वयानि एतान् ? याचनया प्रतिवेशिनः मुहुर्मुहुः कदर्थिताः। पुनर्याचितुं मनो नोत्सहते। अन्तर्गृहे किमपि नास्ति। सर्वाणि भाण्डानि रिक्तानि। अद्यतनं दिनं कथं यापयेयम् ? (अश्रूणि प्रोञ्छति। बहिर्विलोक्य हर्षितमुद्रया) आम्, आगच्छन्निव प्रतिभाति आर्यपुत्रः।

(ततः प्रविशति शुष्यद्वदनो दीर्घं श्वसन् गृहीतवसनपोटलिकः परिश्रान्तः सुदामा)

सुदामा – (अटमानः स्वगतम्) नूनमद्य सुशीला भृशं दुःखिता भवेत्। आगमने खलु भूयान् विलम्बो जातः। तया एकाकिन्या दिनत्रयं यापितम्। (समक्षं गत्वा) सुशीले ? गृहाण। अस्मिन् वारे तु वृष्ट्या महती बाधा उपस्थापिता। चलितुं न पारितम्। भिक्षापि पर्याप्ता न जाता। सर्वेषु गृहेषु गन्तुं नापारयम्। एतावन्मात्रमस्ति। (झोलिकां पन्त्याः पुरतः स्थापयति। सुशीला अश्रूणि विमुच्य पतिं प्रणम्य झोलिकां गृह्णाति)

सुशीला - (सौत्सुक्यम्) एतावन्मात्रम् ? समयस्तु भूयान् लग्नः। परं भिक्षा एतावती एव ?

सुदामा – (निःश्वस्य) आम् सुशीले ? किं करवाणि ? अटनमेव असम्भवं जातम्। सन्तोषं धारय। अधुना यावत् प्राप्तं तावता कार्यं

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चालय । अन्यस्मिन् उपयुक्तदिवसे पुनरवशिष्टां भिक्षामानेष्यामि । अद्य खलु अहमतीव श्रान्तोऽस्मि किञ्चिद् विश्राम्यामि । त्वमपि इतः किञ्चित् पाचय । बालान् भोजयित्वा स्वयं च भुङ्क्ष्व । मम कृते चिन्ता न कार्या । (गच्छति)

सुशीला - (झोलिकां विलोक्य स्वगतम्) दिनत्रयं महता कष्टेन यापितम् । भिक्षा चैतावती एव । यदि अधिकं पाचयेयं तर्हि पुनः सैव स्थितिरुपेयात् । अतो द्वित्रमुष्टिमितमेव पाचयित्वा आर्यपुत्रं बालांश्च भोजयिष्ये (सगद्गदस्वरमक्षिणी प्रोञ्छ्य) स्वयमपि द्वित्रान् कवलान् भुक्त्वा पानीयं पास्यामि । (रोदिति)

(वृद्धप्रतिवेशिन्याः प्रवेशः)

प्रतिवेशिनी - पुत्रि सुशीले ! सकुशलासि ? रुदतीव प्रतिभासि । किमर्थम् ?

सुशीला - (अश्रूणि परिमार्ज्य) किं कथयामि मातः ? मम मन्दभाग्यायाः कृते याचनमेव विधात्रा लिखितम् । दैन्यमेव दैनन्दिनमवलम्बनं जातम् । नास्ति तादृशः कोऽपि दिवसः यदा भाण्डानि पूरितानि द्रष्टुं पार्येरन् । नास्ति खलु तादृशमेकमपि दिनं यदा बालानां भोजनचिन्ता नापतेत् ? नवीनं वसनं, नवीनानि आभूषणानि मम कृते केवलं स्वप्नविलोकनीयानि संवृत्तानि । कन्यैवास्य परिवारस्य सुलभा । कीदृशीयं विडम्बना ? किं विद्याया विभवस्य च सर्वदा विरोधिता ? सरस्वत्या लक्ष्म्याश्च सर्वदा सापत्न्यम् ? मातः एतत्सर्वं स्मारं स्मारं विदीर्णमिव भवति मम हृदयम् ।

प्रतिवेशिनी - (सवात्सल्यम्) पुत्रि ! सुशीले ! धैर्यं धारय । विश्वसिहि
विफलत्वं क्वचिन्नैति निष्ठया साधितं तपः ।
मलतोयभृतो वृक्षः क्व नास्ति फलपूरितः ?
कल्याणि ! सर्वाणि दिनानि न समानानि । एतावत् कष्टं सोढ्वापि त्वया भर्ता न कदर्थितः । परमेश्वरस्य पुरतो दुःखं न प्रकटितम् । अस्य तपसः फलं न दूरस्थम् । शृणु अहमेकमुपायं वदामि । तव भर्ता रुक्मिणीभर्तुर्भगवतो द्वारकाधीशस्य बाल्यकालिकः परमः सखा । एकवारं तत्सकाशं गत्वा स्वकीयां स्थितिं निवेदयितुं त्वं स्वभर्तारं प्रेरय । रुक्मिणीवल्लभस्य पुरतः कृता एकैव याचना तव समग्रं जीवनं सुखमयं विधास्यति ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुशीला - (सनिःश्वासम्) एतदेव तु दुष्करम्। आर्यपुत्रः भगवतः सकाशे याचनां न साधु मन्यते। स तु श्रोतुमपि न वाञ्छति तादृशीं याचनाम्। स खलु आजीवनं निष्कामं तपो भगवति निःस्पृहां भक्तिञ्च बहु मन्यते। कथमहं कथयेयं तस्य समक्षम् ?

पतिवेशिनी - (सस्नेहम्) पुत्रि ! एकवारं प्रयतस्व। स्वभर्तारं प्रेरय द्वारकां गन्तुम्। परमकारुणिको भगवान् रुक्मिणीवल्लभो दर्शनमात्रेण सर्वं विधास्यति।

सुशीला - (विनम्रतया) मातः ! भवत्याः परामर्शं मनसि निधायावश्यं प्रयतिष्ये। कृतज्ञाऽस्मि भवतीं प्रति।

प्रतिवेशिनी - वत्से ! अवश्यं पूर्णा भविष्यन्ति ते मनोरथाः।
भगवान् रुक्मिणीनाथः स्वभक्तेष्वतिकोमलः।
वाञ्छां विफलयन् दृष्टः कल्पवृक्षोऽर्थिनः क्वचित् ?

(गच्छतः)

(पटाक्षेपः)

तृतीयं दृश्यम्

(स्थानम् सुदाम्नः कुटीरस्य प्राङ्गणम्। शूर्पे तण्डुलान् परिमान्ती सुशीला प्रविशति। सम्मुखतः सुदाम्नः प्रवेशः। सुशीला अश्रूणि प्रोञ्छति)

सुदामा - (समीपं गत्वा) सुशीले ! भिक्षाटनं गते मयि कापि विशेषबाधा तु नापतिता ! कोऽपि मिलितुमागतः ? प्रत्यावर्तने विलम्बोऽपि भूयान् जातः (सुशीला पुनः अश्रूणि प्रोञ्छति) प्रिये ! रोदिषि त्वम् ? मुहुर्मुहुरश्रूणि प्रोञ्छसि ? किं जातम् ? सर्वं कथय।

सुशीला - (सवाष्पभिन्नस्वरम्) आर्यपुत्र ! किं कथयामि ? नेदं पुरुषजातिवेद्यम्। गृहे किं किं जायते केवलं गृहिण्यः स्त्रियो जानन्ति। भवति भिक्षार्थं गतवति दिनत्रये या स्थितिरुत्पन्ना नाहं तां वर्णयितुं समर्था। प्रातः समये बाला रुदन्ति "अम्ब ! क्षुधार्ताः " सायंसमयेऽपि तेषां स एव स्वरः श्रूयते "मातः क्षुधा लगति"। अन्तः प्रविश्य विलोकने भाण्डेषु मुष्टिमेयमपि अन्नं नास्ति। (सस्वरभङ्गम्) विवशतया नतेन शिरसा प्रतिवेशिन्याः सकाशाद्

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

याचितम्। भवानेव भावयतु तदा मम का दशाऽभवदिति। तस्यामवस्थायां किमहं कुर्याम् ? लज्जा, स्वाभिमानः, स्वगौरवं सर्वं न्यासीकृतम्। यद् याचितं तदपि दिनद्वये समाप्तम्। भवान् नायातः। तृतीयदिनं कथं यापयेयमिति महती चिन्ता समुद्भूता। यावद्व्याकुलमनसा चिन्तयन्ती आसं तावद्भवान् प्राप्तः। अन्यथा (सकण्ठस्तम्भम्) तद्दिने किं स्यादहं न जाने (साश्रुप्रोञ्छनं किमपि स्मृत्वा) आम् आर्यपुत्र ! मम एका वार्ता अस्ति कथनीया। यदि भवतोऽनुमतिः स्यात् तत् कथयामि।

सुदामा - सुशीले ! किमिदमपि प्रष्टव्यम् ? मां प्रति किमपि कथयितुं त्वया ममानुमतिर्नास्ति प्रतीक्षणीया। त्वां प्रति मम सर्वदानुमतिः। कथय किमस्ति कथनीयम् ? निःशङ्कमनसा कथय।

सुशीला - आर्यपुत्र ! मया बहुशः श्रुतं भवान् रुक्मिणीवल्लभो भवतोबालमित्रमिति। किमिदं न तथ्यम् ?

सुदामा - अयि मुग्धे ! किं विश्वसिषि एतत् ? क्व भगवान् लक्ष्मीपतिः ! क्वाहमकिञ्चनो, दीनो हीनश्च ! का आवयोर्मित्रता ? समानशीलव्यसनेषु हि मैत्री सम्भवति। भगवता सह मम मित्रतायास्तु कल्पनापि न सम्भवा।

सुशीला - मया भवन्मुखादपि एकवारम् आकर्णितमासीत् यद् भवन्तौ बाल्ये वयसि एकस्मिन्नेव गुरुकुले न्यवात्सीष्टाम्। सहैव च अध्ययनं कृतवन्तौ। भवतोः परस्परं प्रगाढं सौहार्दञ्च आसीदिति। (पुनस्तण्डुलान् मुष्ट्या परिमाति)

सुदामा – सुशीले ! विस्मर एतत् सर्वम्। एषा खलु अतीव पुरातनी कथा। भूयान् समयो गतोऽधुना। मादृशस्य वराकस्य सौहार्दं किं भगवान् रुक्मिणीनाथो बहु मन्येत ? मैत्री आसीद् आवयोः, परन्तु तदानीम्। अधुना तु द्वारकाधीशस्तां सर्वथा विस्मृतवान् भवेत्। (गम्भीरतया) सुशीले ! किञ्चिद् विश्रम्य मनोगतं सर्वं कथय। अद्य किमस्ति तव मनसि ? किमर्थमिमां दीर्घां भूमिकां बध्नासि? यत्कथनीयं संक्षेपेण स्पष्टं कथय। (समीपे गत्वोपविशति, तामपि उपवेशयति) आम् मन्ये रुक्मिणीनाथेन सह ममास्ति मैत्री। त्वं किं कथयितुं वाञ्छसि ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुशीला - (ससंकोचम्) रुक्मिणीनाथः खलु अतीव कोमलहृदयः। स्वजनैः सह सकृज्जातां मैत्रीं स नैव विस्मरति। विशेषतः स्वभक्तानां लघूनपि प्रीतिप्रसङ्गान् स बहु मन्यते। प्रतिमासे प्रतिपथं च भवता ग्रामे ग्रामे याचनीयमस्ति। परमकारुणिकस्य द्वारिकानाथस्य पुरतो गत्वा एकवारं भवन् याचताम्। ततः परं भवतो याचना सर्वथान्तं गमिष्यति। परमकष्टमयी एषा भिक्षाटनवृत्तिरपि समाप्तिमेष्यति अस्मत्परिवारस्य दुःखमपि विगतं भविष्यति।

सुदामा – (कर्णौ पिधाय) सुशीले ! त्वं हि कथयसि एतत् ? एतत्त्वहं श्रोतुमपि नेच्छामि-

न खलु न खलु किञ्चिद् याचितुं कामयेऽहं
भगवति मम सख्यं नैव वाणिज्यवृत्तिः।
प्रतिफलनिरपेक्षा प्रीतिरास्तां मुकुन्दे
मनसि लसति सैषा केवला भावना मे॥

सुशीला - (सरोदनम्) आर्यपुत्र ! नाहं मम कृते कदापि भवन्तं कदर्थितवती। कञ्चुकं जीर्णं भवतु, शाटी वा पुराणी भवतु मया किमपि न निगदितम्। अहं तु भवतश्छायातुल्यास्मि। भवतो यत्सुखम्, तदेव मम सुखम्। भवतो यद्दुःखं तदेव मम दुःखम्। नाहं स्वस्याः कृते किमपि वाञ्छामि। परन्तु आत्मजातानामेतेषां बालानां (त्रयो बालका एकतः प्रविश्यान्यद्वारान्निर्गच्छन्ति) कृते निवेदयामि। एते सुखिनः सन्तु तदेवावयोः सुखम्। मम निवेदनमुररीकृत्यैकवारमार्यपुत्रो द्वारकां गत्वा भगवतः सन्निधौ याचताम्। एतावन्मात्रं मम प्रार्थनाविषयः। (अश्रूणि प्रोञ्छति)

सुदामा - (रोषं प्रदर्शयन्) सुशीले ! इदमसंभवम्।वारंवारं मां किमर्थं कदर्थयसि ? अहं कृष्णस्य समीपे याचितुं नैव गमिष्यामि। इमामाशां परित्यज। निष्कामतैव मम परमं धनम्।

सुशीला - (सानुनयम्) भवतु, भवतु। आर्यपुत्र ! क्षमतां भवान् माम्। नाहमाग्रहीष्यामि याचितुम्। भवान् केवलं द्वारकां गत्वा रुक्मिणीनाथस्य दर्शनमात्रं करोतु। तावतैव सर्वं कार्यं सेत्स्यति। सर्वेषां हृदयस्थितो भगवान् केशवोऽवश्यं भवन्तं विलोक्यैव सर्वां ज्ञास्यति वस्तुस्थितिम्। कृपयिष्यति चावाम्। (अश्रूणि प्रोञ्छति)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुदामा - (ससन्तोषम्) आम् सुशीले ! इदं त्वया समीचीनं भणितम् । केवलं दर्शनार्थं यदि मां प्रेरयसि तर्हि अवश्यमहं द्वारकां गमिष्यामि । भगवतो रुक्मिणीजानेः सुदुर्लभेन दर्शनेनात्मानं सौभाग्यभाजनं करिष्यामि । परमिदमिहैव स्पष्टं कथयामि । अहञ्च तत्र नकिमपि याचिष्ये । यदि प्रत्यावर्तनकालेऽहं रिक्तहस्तः स्यां तर्हि त्वया किमपि न भणितव्यम् । (उपरि विलोक्य)

जयति स कमलेशो यत्कृपाऽद्यैव दृष्टा
यदुदयत इहैषा प्रेरणा द्वारकायै ।
शुभमिह यदि किञ्चित्संभवेद्भाविकाले
भवति कुशलचिह्नैः पूर्वसङ्केतितं तत् ॥

प्रिये ! सन्तुष्टा भव । तव प्रेरणयाऽनयाऽहं द्वारकामवश्यमेष्यामि । श्व एव इतः प्रस्थास्ये । श्रीकृष्णदर्शनप्रेरणयाऽद्य आत्मानमनुगृहीतमनुभवामि । एतस्य कृते त्वमेव निमित्तमसि, अतस्तुभ्यं साधुवादः ।

सुशीला - (सस्मितम्) आर्यपुत्र ! अद्याहं भृशं सुखितास्मि । भवतो द्वारकायात्रा नूनं मङ्गलाय भविष्यति इति मम द्रढीयान् विश्वासः । गच्छावः श्वस्तनयात्राया व्यवस्थां साधयावः ।

(गच्छतः)

(पटाक्षेपः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयोऽङ्कः

प्रथमं दृश्यम्

(स्थानम्– सुदाम्नः कुटीरस्य बहिःपरिसरः । द्वारकागमनोद्यतस्य सुदाम्नो मङ्गलश्लोकान् पठतः प्रवेशः)

सुदामा - (किञ्चित्स्मृत्वा) अहो ! अतिमहत्त्वपूर्णं वस्तु विस्मृतम् । शून्यहस्तो रुक्मिणीवल्लभस्य सम्मुखं कथं गच्छेयम् ? अयि सुशीले ! क्वासि । शीघ्रमागच्छ । (नेपथ्ये) आर्यपुत्र ! आगच्छन्ती अस्मि । (त्वरमाणायाः सुशीलायाः प्रवेशः)

सुशीला - (सौत्सुक्यम्) आर्यपुत्र ! किमर्थमाकारितास्मि ?

सुदामा - (रोषमिव दर्शयन्) अयि मुग्धे ! मां रिक्तहस्तं प्रेषयसि ? मान्यानां पुरतो रिक्तहस्तेन न गन्तव्यमिति लोकमर्यादा । अहमपि विस्मृतवान् । त्वयापि न स्मारितम् । शीघ्रं किमपि उपायनमानय । अगृहीतोपहारः कथं गच्छेयं द्वारकानाथसमक्षम् ?

सुशीला - (निटिले हस्तं धृत्वा स्वगतम्) कथञ्चन महता आग्रहेण आर्यपुत्रो द्वारकां गन्तुं समुद्यतः । इयमपरा समस्या समापतिता । अन्तर्गृहे उपायनयोग्यं किमपि नास्ति । किं कुर्याम् ? कुतः किमानीय दद्याम् ? (किञ्चिद् ध्यात्वा) आम्, एकमुपायं करिष्यामि । (प्रत्यक्षम्) आर्यपुत्र ! क्षणं प्रतीक्षतां भवान् । कुतोऽपि उपायनमानीय शीघ्रमागमिष्यामि । (गच्छति)

सुदामा - (स्वगतम्) दृश्यतां तावत् द्वारकायात्रायै समुद्यतोऽभवम् उपायनस्याभावेन मार्गोऽवरुद्धः । सर्वदाऽभावपीडितमिदं जगत् ।

इतोऽप्यभावोऽस्ति ततोऽप्यभावः
क्षणे क्षणेऽभावपदानि लोके ।
न तादृशः कोऽपि जनोऽत्र दृष्टो
यः सर्वथाऽभावदशाविमुक्तः ॥

धन्यास्ति सेयं मम प्राणवल्लभा तपस्विनी सुशीला याऽभावशतमपि सोढ्वा सोत्साहं मम लक्ष्ये सहायिका भवति ।

(उपायनं गृहीत्वा सुशीलायाः प्रवेशः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुशीला- (सहर्षम्) आर्यपुत्र ! भगवतः करुणया भवतः सदिच्छया च प्रतिवेशिन्या पृथुकतण्डुलाः प्रदत्ताः। एषा मुष्टित्रयस्य पोटलिका भगवतो द्वारकेश्वरस्य कृते मम भक्त्युपहारः। एषा मुष्टिद्वयस्य लघुतरा पोटलिका च भवतः स्वल्पाहारस्य कृते दत्तास्ति। (जीर्णपटबद्धं पोटलिकाद्वयं ददाति) भवता ममैका विशेषप्रार्थना स्वीकरणीया। भगवन्तं द्वारकाधीशं प्रति मम प्रणतिः प्रापणीया। प्रत्यावर्तने विलम्बः सर्वथा न कार्यः।

सुदामा - कल्याणि ! अस्तु। यथा भणसि तथैव भविष्यति। (सानन्दम्) प्रिये। मम दक्षिणाङ्गानि स्फुरन्ति। नूनं भगवतो रुक्मिणीनाथस्य दर्शनं सम्भविष्यति। तव मनोरथश्च सिद्धः स्यात्। अस्तु, अधुना गच्छामि।

सुशीला - (उपरि विलोक्य) या द्वारकाधीशस्य कृपा। (प्रत्यक्षम्) सकुशलं गच्छत्वार्यपुत्रः। भवता अस्माकं चिन्ता न कार्या।

(गच्छति)

सुदामा - (द्वारस्थापितपूर्णकलशयुगस्य जलेन शिरोऽभिषिच्य मङ्गलं पठन् निर्गच्छति। अटमानः स्वगतम्) सुशीलया भृशमाग्रहः कृतः। इदानीं श्रीकृष्णस्य मम परममित्रस्य दर्शनार्थं गच्छन्नस्मि। अहमस्मि निःस्पृहः। रुक्मिणीवल्लभस्य पुरतः किमपि न याचिष्ये इति मे सङ्कल्पः। सुशीला चातीव आशावती मां विदापितवती अस्ति। तस्या आशायाः किं भवेत् ? यद्भवति तद्भवतु। मया तु यद्भणितव्यं तद्भणितम् – यदि अहं रिक्तहस्तः प्रत्यावर्तेयं तर्हि खिन्ना मा स्म भवेरिति। अत्र संसारे जीवनं जीविका चेति द्वयं वर्तते। तत्रादानं जीविका भवति दानं तु जीवनम्। अहं जीविकायाः कृते नास्मि चिन्तितः। सा यथाकथञ्चन चलति। अहं तु जीवनं चिन्तयामि। जीवनमिदं प्रवाहरूपम्। अनेन सदैव वहनीयम्। दानमस्य जीवनप्रवाहस्य सर्वस्वभूतम्। यथा अनेन सर्वदा वहनीयं तथैवानेन सर्वदा देयम्। सव्ये देयम्, दक्षिणे देयम्, अग्रे देयम्, पृष्ठे देयम्। जीवनं दानशीलमस्तु प्रवहतु च सततम्। (गायति)

वह हे जीवन ! वह सततम्।
विरतिमेत्य मलिनत्वं मा गा मा भूल्लक्ष्यं विहतम्॥ वह...बन्धं
छित्त्वा विघ्नान् भित्त्वा मुक्तगतिर्वरणीया।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विकृतिःस्यात्तव वहनविरामे भव साध्ये निरतम् ॥ वह ..
पथि मिलतां त्वयि प्रणयजुषामुपशमय तृषामखिलानाम् ।
कलकलन्निनदैः श्रुतिपुटसुखदैः कुरु कुशलं भुवि विततम् ॥ वह.....
दक्षे भूमिः सव्ये भूमिर्भूमिवृतं त्वं परितोऽसि ।
पूरय तासां सकलामाशां पोषय हृदि सुकृतम् ॥ वह.....

जीवनमिति जलस्यापि संज्ञा । वस्तुतो यथा जलं लोकजीवनं तर्पयति तथैव जलरूपमेवेदं जीवनम् । अनेन लोकजीवनमाप्यायितव्यम् (किञ्चिद् विचार्य) आम्, बहु चलितम् ।श्रममनुभवामि । (समक्षं विलोक्यम्) ओम्, पुरतः किञ्चिद्दूरे पिप्पलवृक्ष इव प्रतिभाति । ओम्, तत्रैवैकः कूपोऽपि दृष्टिपथमवतरन्नस्ति । ततः किञ्चिज्जलमुद्धृत्य सुशीलादत्तान् पृथुकतण्डुलान् मुष्टिमितान् भुक्त्वा पानीयं पीत्वा किञ्चिद् विश्रम्य पुनश्चलामि (श्रमं दर्शयन्) पूर्वं तु आदिवसात् चलित्वापि श्रमो नान्वभूयत । अधुना तु वयःप्रभावेण भवेद् द्वित्रकोशेष्व भूयान् श्रमोऽनुभूयते । (किञ्चिदग्रतो गत्वा कूपाज्जलमुद्धृत्य पृथुक्तण्डुलान् भुक्त्वा पानीयं च पीत्वा भूमौ विश्राम्यति गाढनिद्रायां च निमज्जति) ।

(पटाक्षेपः)

द्वितीयं दृश्यम्

(स्थानं द्वारकाया भवनम् ।सिंहासनारूढः श्रीकृष्णो रुक्मिण्या सह वार्तां कुर्वन् दृश्यते । पटोत्थापनं भवति । विभवसूचकानि वस्तुजातानि इतस्ततो दृष्टिपथमायान्ति) ।

श्रीकृष्णः - (सप्रसादम्) वैदर्भि ! नूनमद्य कोऽपि सुखदः समाचारः श्रुतिगोचरो भविष्यतीति मम मनसि लगति । अद्य प्रातरुत्थानकाले मया कतिपयानि मङ्गलशकुनानि दृष्टानि ।

रुक्मिणी - एवम्, स्वामिन् ! अद्य प्रातः सूदकोऽकथयत् पाकशालायामग्नेर्विचित्र एव झर्झरध्वनिः श्रुतः । एतादृशो ध्वनिः कस्यापि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विशिष्टातिथेरागमनं सूचयतीति लोकप्रसिद्धिः। तन्नूनं कोऽप्यभ्यागतोऽद्य दर्शनप्रदानेनास्मान् कृतार्थयिष्यतीति मन्ये।

श्रीकृष्णः - (भावार्द्रतया किञ्चिद् ध्यात्वा) रुक्मिणि ! यदि मम कोऽपि प्रेमी मां स्मरेत् तर्हि तस्य विशेषप्रतीतिर्मम मनसि भवत्येव। अद्य तथैव एका विलक्षणा प्रतीतिर्मम मनसि जायमानास्ति (पुनः किञ्चिद् ध्यात्वा) आम्, रुक्मिणि ! अवन्तिवास्तव्यः परमतपस्वी एको विद्वैकव्यसनी विप्रवरः। सुदामा इति तस्य नामधेयम्। स खलु मम सतीर्थ्यः। समाने गुरुकुले आवामधीतवन्तौ। स एव मम मित्रवरः स्वभार्यायाः प्रेरणया मां द्रष्टुं द्वारकामागच्छन्नस्ति। तस्य भार्या च महान्तौ आशाविश्वासौ मनसि धृतवती मां स्मरति।

(स्मृतिमुद्रां प्रदर्शयति)

रुक्मिणी - स्वामिन् ! अद्य भवानतीव भावुकदशामाप्तः कमपि प्रेमपूर्णं प्रसङ्गमिव स्मरन् प्रतिभाति। कोऽसौ प्रसङ्गो भवेत् ?

श्रीकृष्णः - वैदर्भि ! नास्त्यत्र प्रसङ्गविशेषस्य सम्बन्धः। प्रेमैव खलु स मूलप्रसङ्गः। रुक्मिणि ! त्वमपि प्रेम्णैव मत्सकाशमाप्ता। प्रेमसारा खल्वियं सृष्टिः। पश्य-

दृष्ट्वा नीलं नभसि जलदं यान्ति हर्षं मयूरा
उत्कल्लोलो भवति जलधिश्चन्द्रमालोक्य पूर्णम्।
प्राप्ते भानावुदयशिखरं फुल्लपुष्पा नलिन्य
इत्थं प्रेमप्रसरमधुरा सृष्टिरेखा विभाति॥

रुक्मिणी - स्वामिन् ! एतत् सत्यम्। प्रेमैव सर्वान् सन्निकर्षं जयति। प्रेम्णैव सर्वेऽपि लोकसम्बन्धा मधुरा भवन्ति।

श्रीकृष्णः - (भावार्द्रमुद्रया) वैदर्भि ! नूनमद्य अतीतस्य स्मरणेन सहैव मम बाल्यजीवनमिदानीन्तनमिव भूत्वा मन्मानसे स्फुरति। अहो-

तच्चापलं स च स्नेहस्तत्सख्यं तच्च शिक्षणम्।
अधुना तद्गतं सर्वं स्मृतेरेकास्ति माधुरी॥

आम्, अहं तु प्रेम्णः परिचर्चायां दूरं गतः। अहं भावदृष्ट्या पश्यामि स खलु मित्रवर्यः पथि चलन् विश्रमितुकामो गाढनिद्रामापन्नः। यदीयमेव स्थितिस्तस्य स्यात्तर्हि मासैरपि नैवागन्तुं पारयेत्। अतःकाञ्चिद् विशेषव्यवस्थां करोमि। (अन्तः आकारयति) योगमाये। शीघ्रमेहि। (नेपथ्ये) इयमस्मि भगवन् ! (शिरः

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्थापिताञ्जलिपुटा योगमाया प्रविशति) योगमाये ! गच्छ । मम मित्रं सुदामानं पथि विश्रमन्तं शयानमेवोत्थाप्य द्वारकां प्रापय ।

योगमाया - (सप्रणामम्) यदाज्ञापयति प्रभुः । (गच्छति) ।

(क्षणं पटक्षेपो भवति)

(नेपथ्ये सतालवाद्यं कीर्तनं श्रूयते)

द्वारकानायकं वासुदेवं भजे
रुक्मिणीवल्लभं कृष्णचन्द्रं भजे ॥
इन्दिरामन्दिरं सर्वदा सुन्दरं
देवकीनन्दनं श्यामलं त भजे ॥

(पटोद्घाटनं भवति । एकस्य सरोवरस्य तटे घनच्छायस्य वृक्षस्य तले सुप्तोत्थितोऽक्षिणी मर्दयन् सुदामा दृश्यते । समीपे विशालानि भववानि वृष्टिमायान्ति एकः सशस्त्रो दौवारिकोऽटमानः सम्मुखमायाति)

सुदामा - (इतस्ततो विलोक्य साश्चर्यं स्वगतम्) अहो ! किमिदं विचित्रम् ! कुत्रास्मि समागतः ! इदं खलु स्थानं सर्वथाऽदृष्टपूर्वम् ! अहो ! अतिविलक्षणं सौन्दर्यमस्य परिसरस्य । परं प्राक्तनं तत् सर्वं क्व गतम् ? क्वासौ पिप्पलवृक्षः ? क्व चासौ कूपः ! अहो आश्चर्यम् । अयं सरोवरः, एतानि फुल्लकमलानि !

तत्र सुप्त इह प्राप्तः सर्वथा नूतने स्थले ।
स्वप्नसृष्टमिदं सर्वमुताहो करुणा हरेः ?

(दौवारिकं दृष्ट्वा स्वगतम्) ग्राम्, कोऽपि अस्य क्षेत्रस्य रक्षकः सम्मुखमेवागच्छन् दृश्यते । तावत्पृच्छामि एनम् (उत्थाय पुरो गत्वा) शृणु भोः । मम खलु द्वारका गमनीया । मार्गमहं न जाने । दर्शय मां द्वारकामार्गम् ।

दौवारिकः - (साश्चर्यम्) विप्रवर्य । किमिदं पृच्छसि ? भवता द्वारकामागतेन तस्या मार्गः पृच्छ्यते ! कीदृशोऽस्ति भवान् ? इयमेव तु द्वारका ! न पश्यति भवानिमानि पुरःस्थितानि महाराज्ञीनां विशालानि भवनानि ? पश्य, एतद्रुक्मिणीमन्दिरम्, इदं सत्यभामासदनम्, तच्च जाम्बवतीनिकेतनम् । स च कालिन्दीनिलयः सोऽसौ लक्ष्मणालयः, तदिदं मित्रविन्दानिशान्तम् । एतत् सत्यासदनम्,

Jayatu Saṇskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तच्चेदं भद्राभवनम्। चिन्ता न कार्या। भवानिदानीं सर्वथा द्वारकायामस्ति। (गच्छति)

सुदामा - (भावार्द्रस्वरेणोपरि विलोक्य) धन्योऽस्म्यनुगृहीतोऽस्मि। प्रिये सुशीले ! त्वमपि धन्यासि।

सुप्तो मध्येपथमहमिह प्राप्तवानस्मि सद्यो
लम्वः पन्था अपि भगवता स्वेन संक्षेपितोऽयम्।
यासीच्चिन्ता मम हृदि हरेर्दर्शनं स्यान्नवेति
कृत्वा हृष्टं हृदयमधुना लीनतां सा प्रयाति॥

परम् इतस्ततो दौवारिकाः सञ्चरन्तो दृश्यन्ते। अन्तः कथं प्रवेशनीयम् ? (अन्तर्गच्छन्तं विप्रसमूहं विलोक्य) आम्, चेतः ! समाश्वसिहि। अत्र खलु विप्राणामन्तः प्रवेशो निर्बाधः। (साशङ्कम्) परमेते तु द्वारकावासिनो विप्राः। हृष्टाः पुष्टाः शोभनवसनाभरणयुताश्च सन्ति। मम तु परिधानमपि जीर्णमलिनमस्ति। वपुषापि क्षीणोऽस्मि। कथं प्रविशेयम् ! सर्वथा द्वारकाधीश एव शरणम्। तत्कृपयैव इह प्राप्तः। तत्कृपैव सर्वं साधयिष्यति। कञ्चिदनुकूलं समयं दृष्ट्वा विप्रसमाजमध्यगतोऽन्तः प्रवेक्ष्यामि।

(गच्छति)

(पटाक्षेपः)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीयोऽङ्कः

प्रथमं दृश्यम्

(स्थानम्, द्वारकाभवनान्तर्गतो दानाध्यक्षस्य कार्यालयः। देयवस्तूनि राशीकृतानि दृश्यन्ते। विप्राः स्वं स्वमभीष्टं गृहीत्वा क्रमशो गच्छन्ति। सुदामा मौनं तिष्ठति)

दानाध्यक्षः – (विप्रेभ्योऽभीष्टवस्तूनि वितरन्) यस्मै यस्मै यद् यद् आवश्यकं तत् तद् गृह्यताम्। इतो रिक्तहस्तः कोऽपि न प्रत्यावर्ततामिति भगवतो द्वारकाधीशस्य व्यवस्थास्ति। अतो भवन्तः किमपि गृहीत्वैव गच्छन्तु। (एकस्मिन् कोणे मौनं तिष्ठन्तं सुदामानं संबोध्य) विप्रवर्य ! भवांस्तु किमपि न याचते। किं नास्ति किमपि तेऽभीष्टम् ?

सुदामा - (औदासीन्यं प्रदर्शयन्) दानाध्यक्ष ! नाहमेतानि वस्तूनि कामये।

दानाध्यक्षः – (सौत्सुक्यम्) विप्रवर्य ! स्वर्णम्, रजतम्, अन्नम्, वसनम्, भूमिः, गौः, भवते नास्ति कस्याप्यपेक्षा ?

सुदामा - (सस्मितम्) नाहमेतानि वस्तूनि याचितुं समागतः।

दानाध्यक्षः – विप्रवर ! तर्हि भवता किमर्थमात्मा क्लेशितः ?

सुदामा - दानाध्यक्ष ! अहं केवलं भगवतो द्वारकाधीशस्य दर्शनं वाञ्छामि।

दानाध्यक्षः - (स्वगतम्) अहो ! महत्त्वाकांक्षी द्विजश्रेष्ठोऽयम् ! आकृत्या दीनोऽपि अन्तः सत्त्ववान् प्रतिभाति। (साभिमानस्वरेण प्रत्यक्षम्) विप्रवर्य ! भवान् रुक्मिणीवल्लभस्य दर्शनं कामयते ?

सुदामा - (सगौरवम्) एवम्।

दानाध्यक्षः – (उपेक्षायुतस्वरेण, सुदामानमाशिरःपादं विलोक्य) विप्रवर्य ! अस्ति भगवता सह भवतः कोऽपि सम्बन्धः ?

सुदामा - (उपेक्षामवधार्य) आम्, मम रुक्मिणीवल्लभेन सह घनिष्ठः सम्बन्धः। स खलु मम पुरातनः सतीर्थ्यः। बाल्यकाले आवामेकस्मिन्नेव गुरुकुलेऽधीतवन्तौ।

दानाध्यक्षः – (सादरम्) अस्तु विप्रवर्य ! समीचीनम्। भवान् किंनामधेयः ?

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुदामा – मम नाम सुदामा इति ।

दानाध्यक्षः - कुत्रास्ति भवतो वसतिः ?

सुदामा - अहमवन्तिपुरे वसामि ।

दानाध्यक्षः - आस्ताम्, विप्रवर्य ! भवान् किञ्चित् प्रतीक्षताम् । अहं भगवन्तं निवेदयामि (गच्छति) ।

सुदामा - (सानुरागं गायति) ।

प्रभो ! द्वारकाधीश ! ते द्वारमाप्तः
सुदामा द्विजो दर्शनाकृष्टचित्तः ।
न मे भक्तियोगो न वा शुद्धचित्तं
न रूपं मनोहारि नैवास्ति वित्तम् ॥
न योग्योऽस्मि ते दर्शनार्थं तथापि
त्वदीयानुकम्पा मदन्तर्विभाति ॥
प्रभो...
नयाचेऽहमर्थं न वा प्राज्यभोगम्
भवद्दर्शनं केवलं प्रार्थयेऽहम् ।
प्रभो ! श्रीहरे ! पूरयाशां मदीयाम्
विधेह्यर्थपूर्णां प्रतिज्ञां स्वकीयाम् ॥ प्रभो...
न मे नाथ ! पार्श्वे सुरम्योपहाराः
ऋते नेत्रयोः प्रेमपूर्णाश्रुधाराः
न मे प्रार्थनाया उपेक्षां विधेया
ममैषा दृढाशा प्रभो ! रक्षणीया ॥ प्रभो ..

(ससंभ्रमं श्रीकृष्णस्य प्रवेशः)

श्रीकृष्णः – (सौत्सुक्यम्) अहो ! मम मित्रवर्यः सुदामा समागतः ? कुत्र मम मित्रवर्यः ? (दृष्ट्वा) स्वागतं मित्रवर्यः स्वागतम् ।

सदामा - (श्रीकृष्णं दृष्ट्वा अश्रूणि प्रोञ्छति) अहो भगवन् ! भवद्दर्शनं प्राप्य धन्योऽस्मि सञ्जातः (उभावन्योन्यं गाढमाश्लिष्यत ।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीकृष्णः सुदामानं हस्ते गृहीत्वा अन्तःप्राप्य सिंहासनमारोहयति। सुदामा ससङ्कोचमात्मनो वसनानि हीनदृष्ट्या पश्यन् इतस्ततो दृष्टिं भ्रमयति, सुशीलादत्तमुपहारं च कुक्षौ तिरोधापयति।)

श्रीकृष्णः – (सहर्षं) रुक्मिणि ! सत्यभामे ! जाम्बवति ! कुत्र स्थ ? आगच्छत। अद्य महत् सौभाग्यस्य दिनम्।

(पट्टराज्ञीनां प्रवेशः) पश्यत, एष तपोमूर्तिः विद्याबोधनिधिर्मम बाल्यसतीर्थ्यो मित्रवरः सुदामा अवन्तिदेशात् प्राप्तः। रुक्मिणि ! अद्य यथा कल्पितं तथैव जातम्। विद्यातपोनिधिमेनं सादरं प्रणम्यआत्मानं पुण्यभाजनं कुरुत। (एकैकशः सर्वाः सुदामानं प्रणमन्ति सुदामा च प्रत्येकं शुभाशिषो ददाति)।

सुदामा - (आशीर्मुद्रां प्रदर्श्य) सौभाग्यवती भव, पुत्रवती भव, सौभाग्यवती भव, पुत्रवती भव। (आशीःषु दीयमानासु सुदाम्नः श्वासवृद्धिर्जायते)।

श्रीकृष्णः - (सचिन्तं सस्मितञ्च) शृणुत मुग्धाः शृणुत ! इत्थमेकैकशो यदि यूयं प्रणमथ तर्हि तु मम मित्रवरस्य श्वासोपरि सङ्कटमापतेत्। अवशिष्टाः सर्वा एकवारमेव प्रणमत।

(सर्वाः समागत्य एकवारं प्रणमन्ति)

सुदामा - (बहुवचनं प्रयोज्य) सौभाग्यवत्यो भवत (इति आशिषं ददाति)।

श्रीकृष्णः - (महिषीः प्रति) शीघ्रं गत्वा पवित्रजलं समानयत। अस्य विद्यातपोविग्रहस्य द्विजश्रेष्ठस्य चरणौ प्रक्षालयामि। (सर्वाः जलमानयन्ति) अहो ! एतावन्तो जलपूर्णघटाः। एतावता जलेन चरणौ प्रक्षालनीयौ ? नहि नहि। अधिकशैत्येन मम मित्रवर्यो नैव कदर्थनीयः। सर्वघटानां जलमेकस्थं कृत्वा आनयत। सर्वाभ्यः सन्तोषोऽपि भवति, चरणप्रक्षालनमपि शैत्यातिशयहेतुर्न भविष्यति। (रुक्मिणीसत्यभामे जलमेकघटस्थं कुरुतः। श्रीकृष्णः सुदाम्नः चरणौ प्रक्षालयति। महिष्यः सामग्रीरुपस्थापयन्ति। श्रीकृष्णः सुदाम्ने नवीनवसने समुपहृत्य, सविधि पूजां विधाय, पुष्पमालां परिधाप्य नीराजनं करोति। सुदामा ससङ्कोचं स्वीकरोति। पूजान्ते स्वयमपि सहैवोपविशति)।

श्रीकृष्णः - (सहर्षम्) मित्रवर ! अपि कुशली भवान् ? बहोः कालाद् वयं स्मृताः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुदामा – प्रभोः करुणया सर्वं समीचीनमस्ति। स्मरणं तु प्रतिदिवसं समजायत परं सङ्गमप्रसङ्ग इत्यतः कालात्परमद्यैव भवतोऽनुकम्पया समजनि। दर्शनं प्राप्तम्। अतीव प्रसन्नोऽस्मि।

श्रीकृष्णः – मित्रवर्य ! भवता स्मर्यन्ते तानि दिनानि येषु आवां गुरुकुले अधीयानौ आस्वः ? एकस्मिन् दिवसे गुरुमात्रा मुष्टिद्वयमितान् चणकान् दत्त्वा आवां वनं प्रेषितौ। प्रत्यावर्तनकाले वृष्ट्या मार्गोऽवरुद्धः। आवां वृक्षकोटरे रात्रिं यापितवन्तौ।

सुदामा – (भावार्द्रतया) भगवन् ! मादृशेन वराकेण सह जातमपि वृत्तं लक्ष्मीनाथो भवान् न विस्मरति। यत् खलु भवतापि न विस्मर्यते तदहं कथं विस्मर्तुं पारयेयम् ? धन्या भवतः कोमलता। अन्यत् तु किञ्चिद् विस्मरेयमपि परन्तु तं प्रसङ्गं कथं विस्मरेयम् ? गुरुकुले वसन्नहमेकवारं वनान्निवर्तमानः कण्टकविद्धचरणो रुधिरं स्रावयन्नपि चलन्नासम्। बलदेवेन सह भवान् रथेन गुरुकुलं गच्छन् पथि मिलितः। मां दृष्ट्वैव सत्वरं रथादवतीर्य मदीयचरणगते व्रणे औषधं विलेप्य स्वपीताम्बरस्य खण्डेन वसनपट्टिकां बद्ध्वा मां रथमारोप्य आश्रमं प्रापितवान्। भवतो दीनबन्धोस्तामनुकम्पां कथमहं शक्नुयां विस्मर्तुम् ? (अश्रूणि प्रोञ्छति)।

श्रीकृष्णः – अस्तु मित्रवर्य ! नैव तत् तावन्महत् कार्यम्। तदानीं यत्करणीयमासीत् तदेव मया कृतम्।

दीने दया समे मैत्री वृद्धानामभिवादनम्।

आर्याणामयमादर्शः पालनीयोऽस्मदादिभिः॥

आम्, भवान् खलु गुरुकुलसमयं समाप्य वैवाहिकजीवनं यापयन्नस्ति। भवता सहधर्मिणी तु स्वानुकूला एव अधिगता भवेत् !

सुदामा – नूनं भगवन् ! मम सधर्मिणी भवतोऽनुकम्पया सुतरां मामनुकूला। सा तु मम छायातुल्यास्ति। तस्या नाम सुशीलेति।

मद्दुःखे दुःखिनी नित्यं मत्सुखे सुखिनी च सा।

वस्तुतोऽर्धाङ्गिनी, तस्या यथा नाम तथा गुणाः॥

(सुशीलायाः स्मरणमात्रेण तद्दत्तां जीर्णपटबद्धां पृथुकपोटलिकां कुक्षावन्तः करोति)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीकृष्णः – (स्मेरमुखः) मित्रवर्य ! भवता महतोत्साहेन विवाहः कृतः परं मोदकस्त्वेकोऽपि न प्रेषितः !

सुदामा - (धाष्ट्र्येन) प्रभो ! मया त्वकिञ्चननैकाकिन्या सुशीलया सह एक एव विवाहः कृतः। परं भवता तु अष्टोत्तरशताधिकषोडशसहस्रमिताभिः कन्याभिः सह तावद्वारमेवोद्वाहः साधितः। परमेकवारमपि मोदकस्य कृते नाहं स्मृतः (हसति)।

श्रीकृष्णः - (सुशीलाया नामग्रहणे जाते तदीयमुपहारं स्मरति) मित्रवर ! सुशीलया मम कृते कोऽप्युपहारः प्रेषितः किमु ?

सुदामा - (पोटलिकामन्तः कुर्वन्नुपहारप्रसङ्गं छलयितुं चेष्टते) प्रभो ! अत्र सिंहासने लग्नः कोऽयं मणिः ?

श्रीकृष्णः - मित्रवर्य ! अस्य मणेर्नाम वैदूर्यमणिरिति। भो मित्रवर्य ! मया यत् स्पृष्टं तद्भवता न श्रुतम् ? सुशीलया मां प्रति कोऽप्युपहारः प्रेषितो भवेत् !

सुदामा - (साश्चर्यं स्वगतम्) यदहं लुक्कायितुं वाञ्छामि तदेव मुहुर्मुहुः पृच्छति। अन्तर्यामिनो दृष्टौ किंन्वदृश्यं भवेत् ? (प्रत्यक्षम्) प्रभो ! द्वारकाया मुख्यद्वाराणि कति सन्ति ? तदहं ज्ञातुं वाञ्छामि।

श्रीकृष्णः - (सहासं स्वगतम्) जीर्णपटबद्धतया शुष्कतया चैष सङ्कोचमाप्तस्तमुपहारं नैव दर्शयितुकामः प्रतिभाति। यदि स्वयमेवाहं न गृह्णीयां तर्हि सुशीलाऽत्यन्तं दुःखिता भविष्यति। (प्रकाशम्) तपोनिधे ! अस्ति मम कृते प्रजावत्याः कोऽप्युपहारः ?

सुदामा – (साशङ्कम्) प्रभो ! किंकिंनामधेया अष्टमहिष्यः ? कृपया भगवान् कथयतु।

श्रीकृष्णः - (स्वगतम्) अयं तु उपहारप्रसङ्गं सर्वथा न श्रोतुं वाञ्छति। सुशीलायाः कृते मया किमप्यवश्यमेव करणीयम्। (प्रकाशम्) मित्रवर्य ! भवतो वामकुक्षौ कापि पीडा प्रतिभाति। भवान् वारंवारं वामभुजमूलमुत्थापयति तत्किमर्थम् ? अवश्यं किमपि अस्ति तत्र। (सुदाम्नो वामकुक्षिं दिदृक्षते)

सुदामा - (ससंकोचम्) नास्ति प्रभो ! नास्ति किमप्यत्र।

(तण्डुलपोटलिकां कुक्षेरन्तःस्थापयितुं चेष्टते)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीकृष्णः – (सौत्सुक्यम्) नूनं किमप्यस्ति अत्र। अहं स्वयं पश्यामि। (पोटलिकां बलादाच्छिद्य ग्रन्थिं मुक्त्वा तण्डुलान् भुङ्क्ते)

सुदामा - (सशिरःकम्पम्) न हि न हि प्रभो ! इदं नास्ति भवद्योग्यम्।

श्रीकृष्णः – (भुञ्जानः) अहो माधुर्यमेतेषां तण्डुलानाम् ! नूनं प्रेम्णैव सर्वं मधुरं भवति। भक्तानां प्रेमैव मम कृतेऽमृतम्।

सुदाम - (निवारयन्) न हि न हि भगवन् ! नह्येतद् भवत्करकमले शोभते।

क्व भवान् कमलानाथः क्व चैते शुष्कतण्डुलाः।

विलोक्यैतान् भवद्धस्ते नितरां व्रीडितोऽस्म्यहम् ॥

अहो ! भक्तवत्सलता भवतः। किं कथयेयम् ? जीर्णं पटं विलोक्यैव भृशं लज्जते मनः। उपहारशब्दस्य प्रयोग एव न लगति उपयुक्तः। (सङ्कोचं प्रदर्शयति)

(रुक्मिण्याः प्रवेशः)

रुक्मिणी - (समीपमेत्य) स्वामिन् ! अद्य किमिदमुपलब्धम् एतादृक् मधुरम् ? भावमुग्धतया भवान् किमिदं भुञ्जानोऽस्ति ? (न्युब्जीभूय विलोक्य) आम् पृथुकतण्डुलास्ते पुनर्जीर्णपटबद्धाः ! मम दृष्टौ तु नात्र शुष्कोपहारे कापि स्वादुता प्रतिभाति।

श्रीकृष्णः - रुक्मिणि ! यत्र भावरसस्तत्र सर्वं सरसं भवति।

(पृथुकतण्डुलान् भुञ्जानो भावपूर्णमुद्रया गायति)

न भावादुत्तमं किञ्चिन्मदीये मानसे भाति।

यदल्पं भावतो दत्तं तदेवानन्ततं याति ॥ न भावात्...

न शुष्के वा रसाद्रे वा क्वचिन्मे भेदभावोऽस्ति।

प्रदत्तं प्रेमतो मह्यं समं पीयूषवद् भवति ॥ न भावात्...

धनी स्यान्निर्धनो वा स्यान्न तस्मिन् मूल्यमाकलये।

हृदि स्याद् भावनिर्मलता तदेवाभाति मद्धृदये ॥ न भावात्...

न वस्तून्यर्पणीयानि प्रियाणि स्युः क्वचिन्मह्यम्।

समर्पयिता मदीयः स्यात् सपर्या सा प्रिया मह्यम् ॥ न भावात्...

(मुष्टिद्वयं भुङ्क्ते। तृतीयमुष्टौ गृह्यमाणायां रुक्मिणी रुणद्धि)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रुक्मिणी - (निरुन्धाना) अलमलं स्वामिन् ? अवशिष्टं स्वामिप्रसादरूपेणास्माभिरपि तु भोजनीयम् । इदं मुष्टिमितमस्मभ्यं त्यज्यताम् ।

(आच्छिनत्ति)

श्रीकृष्णः - अस्तु रुक्मिणि ! गृहाण । मया भक्तप्रेमोपहारः सार्थकीकृतः । नूनमेतावता सन्तुष्टोऽस्मि ।

(अन्यमहिषीणां प्रवेशः)

शृणुत । अस्य तपोनिधेः कृते यथा किमपि असौविध्यं न स्यात् तथा व्यवस्थां कुरुत । अत्र यावदभीष्टं मम मित्रवर्यो निवसतु । युष्माभिः परिचर्यायां सम्यगवधानं देयम् ।

महिष्यः – (सशिरोनामं) यदाज्ञापयति स्वामी । (गच्छन्ति)

(पटक्षेपः)

द्वितीयं दृश्यम्

(स्थानं द्वारकाभवनस्यातिथिनिवासः । इतस्तत ऐश्वर्यसूचकानि रमणीयवस्तूनि दृश्यन्ते । प्रत्यावर्तनमिच्छुश्चिन्ताग्रस्तः सुदामा एकाकी अटमानो दृश्यते) ।

सुदामा – (स्वगतम्) सुशीलया प्रस्थानकाले शीघ्रं प्रत्यावर्तितुमाग्रहः कृतः । मया तु विस्मरणशीलेन बहूनि दिनान्यत्र यापितानि । अत्र खलु माधुर्यमूर्ते रुक्मिणीवल्लभस्य सन्निधौ वसतो मम दिवसाः क्षणतुल्याः प्रतिभान्ति । अहो ! आश्चर्यम् ! अज्ञातवत एव मम पक्षाधिकः समयो गतः । विचित्रता खलु भगवतः कालस्य । यतः

दुःखे विवृद्धे प्रतिकूलभावात्

स्वल्पोऽपि लम्बः समयो विभाति ।

स एव सौख्यातिशये सुदीर्घो-

ऽप्यपैत्यबुद्धध्वैव निमेषतुल्यः ॥

(श्रीकृष्णस्य प्रवेशः, दूरादेव दृष्ट्वा) आम्, भगवानपि मम मनोगतं जानन्निव मामनुग्रहीतुमित एवागतः । अस्तु तावत् । इदानीं रुक्मिणीवल्लभमापृच्छामि । (प्रकाशम्) प्रभो ! सुशीलया

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सत्वरं प्रत्यावर्तितुं प्रतिज्ञाप्य प्रेषित आसम्। तां प्रतिज्ञां स्मारं स्मारं मम मनः सोत्सुकं कमपि रणरणकं वहति। अनुगृह्णातु भवान् मां गमनानुज्ञया (प्रणमति)।

श्रीकृष्णः - (स्मेरमुखः) मित्रवर्य ! दर्शनं दत्त्वा वयं धन्यतां नीताः।सर्वोऽपि द्वारकापरिसरः पावनीकृतः विद्यातपोमूर्तेर्भवतः साहचर्येण सर्व एव हृष्टा जाताः। लब्धसेवावसराः महाराज्ञयोऽपि स्वा धन्यधन्या मन्यन्ते। उत्साहमयेऽस्मिन् वातावरणे भवान् गच्छत्विति कथयितुमपि मनः संकुचति। परम् -

सङ्गमो विरहायैव जायते विश्वजीवने।

गन्तव्यमेव भवता ततः स्वीकार्यमेव तत्॥

मित्रवर्य ! यदि भवते रोचते प्रतियातु भवान्। न विस्मरणीयम्। प्रजावत्यै अस्मदादीनां नमस्काराः प्रापणीयाः। पुनरपि सेवावसरप्रदानेन सौभाग्यभाजनीकरणीया वयम्। (गाढमालिङ्गति। रुक्मिणीसत्यभामाप्रभृतीनामष्टमहिषीणां प्रवेशः। ताः प्रति) प्रियाः ! पश्यत। सुखस्य समयो नितरामागमापायी। मम बाल्यसतीर्थ्यः सम्प्राप्त इति मया भवतीभिश्च भूयान् हर्षः समनुभूतः। अद्य पुनः–

दत्त्वा सुखं विमलसन्निधिनाऽखिलेभ्यो

नीत्वा च धन्यतमतां सकलानिहास्मान्।

उद्भावयन् विरहजं पुनरद्य दुःखं

प्रस्थातुमेष सहसेच्छति मित्रवर्यः॥

महिष्यः - (सप्रणामम्) विद्यातपोनिधे ! नैव विस्मरणीया वयम्। सुशीलायै अस्मदादीनां सादरः प्रणामो विनिवेदनीयः।

सुदामा - (सगद्गदस्वरम्) अस्तु स्वस्ति द्वारकाधीशमहिषीभ्यः। प्रभोरानन्दनिकेतनस्य सन्निधौ, अत्र भवतीनां सद्भावभरितेन वात्सल्यव्यतिकरेण च नितरामस्म्यनुगृहीतः। कैः शब्दस्तद् वदामि ? इदानीं गन्तुकामोऽस्मीति, निगदितुमपि मम मनः सङ्कुचतीव। (श्रीकृष्णं प्रति)

पुण्यैः पूर्वचितैः कथङ्कथमपि प्राप्तो भवत्सन्निधिं

गन्तव्यं पुनरद्य गेहमिति मे दोलायमानं मनः।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यामीत्येतदपि स्मृतं मनसि मे दुःखास्पदं जायते

प्रेम्णा नाथ ! निरन्तरेण पदयोर्दीनोऽनुकम्प्योऽस्मि ते ॥

(अश्रूणि प्रोञ्छति। श्रीकृष्णः पुनर्गाढमाश्लिष्य विदापयति। श्रीकृष्णं महिषीश्च भूयो भूयः पश्यन् सुदामा निर्गच्छति। नूत्नमुष्णीषमुत्तरीयं चोत्तार्य स्वकीये पुरातने एव ते पुनर्धारयति।)

(पटक्षेपः)

सुदामा – (एकाकी पथि गच्छन् स्वगतम्) सुशीलायाः प्रेरणया अहं द्वारकामागतः। सा खलु भगवतो धनमाशासाना मां प्रेषितवती। परन्तु मया द्वारकायां भगवत्समक्षं किमपि न याचितम्। स च न किमपि दत्तवान्। इदानीं शून्यवित्त एव प्रतिनिवर्तमानोऽस्मि। सुशीला मां शून्यहस्तं विलोक्य किं भावयेत् ? सर्वथा निराशैव स्यात्। किं कथयानि ? अस्तु यत्कथयितव्यं तत्पूर्वमेव कथितम्। यदि कदाचिद् रिक्तहस्तः प्रत्यावर्तेयं तन्मह्यं गालिं मा दद्या इति। साऽवश्यं तत्स्मरिष्यति। यतो मया त्वाजीवनमयाचितव्रतं परिपाल्यते। सा च तत् सम्यग् जानाति।

भगवता रुक्मिणीजानिना महाकारुणिकेन मयि सम्भावितं वैभवजन्यं तपःक्षयं मनसि निधायैव मह्यं न किमपि दत्तम्। भगवान् यत् करोति कल्याणायैव करोति। यतो हि

वित्तं यदि स्यात् प्रचुरं मदीयं

क्षीयेत मे ज्ञानतपःप्रभावः।

इत्थं विचार्यैव कृपावशेन

न शौरिणा मे किमपि प्रदत्तम् ॥

सम्पत्तिसमुद्भाविता विपरीतमनोदशा जगति प्रायः चर्चाविषयतां गच्छति। यथा–

सम्पत्त्याभिमतिः प्रवर्धत इति ख्यातिर्जगद्व्यापिनी

जायेते मदमत्सरावपि यतो मोहप्रमादावपि।

इत्थं वैभवमाकलय्य बहुभिर्दोषैः सदा सङ्कुलं

भक्तानां हितकृन्न किञ्चिदपि मे प्रादाद् दयालुर्हरिः ॥

(किञ्चित्पुरतो गत्वा परितो विलोकयन्)

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अये ! कुत्राहं सम्प्राप्तः ? एतावतात्पकालेनाहमवन्तीपुरमागतः ? अथवा अन्यदेव कञ्चित् स्थानविशेषम् ? नूनमेषापि कृपानुभूयते रुक्मिणीजानेः। स खलु प्रेमनिधिः स्वभक्तानां कृते किमपि कर्तुमग्रेसरीभवति। नूनं तेनैव साधितमेतत्। यतो दविष्ठमपि स्थानं नेदिष्ठं समजनि। नूनम् -

सङ्कल्पमात्ररचिताखिलसृष्टिचक्रो

मन्दस्मितैर्विरचिताखिललोकपोषः।

भ्रूभङ्गवर्तिविलयो दययार्द्रचित्तो

मामञ्जसाऽऽनयदिहाद्य निवासभूमिम् ॥

(पुनरभितो विलोक्य) अहं खलु पुनरप्यविदित्वैव स्वग्रामं प्रत्यागतः ? क्षेत्रं तु नूनं तदेव परन्तु पुरा यत्र मदीयं गृहमासीत् तत् स्थानन्तु न मयाऽऽसादितम्। नूनं यत्र यथा चलितव्यं तथैव चलितम्। यत्र दिक् परिवर्तनीया तत्र सा परिवर्तिता, कथं पुनरन्यत्र प्राप्तोऽहम् ? (पुनरितस्ततो निभाल्य) न हि स्थानं तु निश्चप्रचं तदेव। परमत्र तु अन्यैवच्छटा परिलक्ष्यते। क्व गतं तत् प्राक्तनं वस्तुजातम् ?

क्वादो जीर्णगृहं क्व चैतदतुलैश्वर्यं महन्मन्दिरं

क्वासौ गौर्जरठा इमाः क्व च बृहत्काया महाधेनवः।

धान्यानां क्व च कुट्टनध्वनिरसौ क्वायं च वीणारवः

सर्वं दृश्यमिहास्ति भिन्नमधुना स्थानान्तरासूचकम् ॥

अहो आश्चर्यम् ! कुत्रास्मि सम्प्राप्तः? (एकः पुरुषः प्रविशति) भो भ्रातः ! कथय सुदाम्नो द्विजस्य भवनं कुत्र वर्तते ? भवान् जानाति !

पुरुषः – (साश्चर्यम्) अये विप्रवर्य ? किं पृच्छसि ? इदमेव भवतो गृहम्। स्वस्यैव गृहं प्राप्यापि पुनः कथं पृच्छन्नस्ति भवान् ?इदमेव तु तत् स्थानं यत्र पूर्वं भवान्न्यवसत्।

सुदामा - (अक्षिणी विस्फार्य) अहो ! किमिदं कथयन्नसि ? कुतः कदा च परिवर्तनमिदं समजायत ? यदि जानासि सर्वं कथय।

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुरुषः - नाहमन्यज्जानामि परमेतन्मम ज्ञातमस्ति यद्भवानेव सुदामा द्विजः। भवति द्वारकां गतवति तृतीयदिवसे भगवतो द्वारकाधीशस्य कृपयेदं सर्वं समजायत। (गच्छति)

सुदामा - (भावार्द्रस्वरेण) प्रभो ? भक्तवत्सल ! धन्या तव प्रेमवश्यता। मुष्टिद्वयमितान् शुष्कतण्डुलान् भुक्त्वैव भवता आवयोरुपरि एतावती कृपा विहिता। सुशीले ! त्वमपि नितरां धन्यासि ? पूरितस्तव मनोरथः। भगवता तव प्रेमपूर्णमुपायनं सार्थकीकृतम्।

(सखीसहायायाः सर्वालङ्कारभूषितायाः सुशीलायाः करस्थितपूजोपकरणायाः प्रवेशः)।

(तां विलोक्य स्वगतम्) केयं नारीरत्नायमाना राजमहिषीतुल्या मामुपसर्पति ? किमिदं रहस्यमिव जायमानमस्ति ? (साशङ्कस्तिष्ठति)।

सुशीला - (उपसृत्य चरणौ स्प्रष्टुं वाञ्छति)।

सुदामा - (निषेधन्) न हि न हि। एतदसम्भवम्। नाहमन्यस्यै चरणस्पर्शं दातुं वाञ्छामि। केवलं मम पत्नी सुशीलैव पारयति मदीयचरणौ स्प्रष्टुम्। कासि त्वम् ? स्वं परिचयं देहि।

सुशीला - (ससङ्कोचं पुनरुपसिसीर्षति)।

सुदामा - (साटोपम्) केयं कदर्थयति माम् ? नाहं वाञ्छाम्येतादृशींधृष्टताम्। अपसर।

एका सखी - विप्रवर्य ! किं भवान् द्वारकां गत्वा एतावान् विस्मरणशीलः समजनि ? यत् स्वकीयां पत्नीमपि न परिचिनोति ? इयं भवतोऽर्धाङ्गिनी सुशीलैव विद्यते नान्या। सम्यग् विलोकयतु भवान्।

सुदामा - (मुखपटान्तरालाद् गभीरतया विलोक्य दीर्घं श्वसन्) आम्, इयं तु मम पत्नी सुशीलैव वर्तते। (सुशीला चरणयोः प्रणम्य सुदामानं चन्दनेन मालया च संपूज्य नीराजयति)।

(भक्तवत्सलस्य रुक्मिणीपतेर्जयोऽस्तु, भक्तानां जयोऽस्तु इति ध्वनिः श्रूयते)।

सुशीला - (विनम्रस्वरेण) स्वामिन् ! चिरकृतज्ञास्मि। मदीया प्रार्थना भवता स्वीकृता। द्वारकाधीशस्य कृपयाऽतः परं नास्ति भवता याचनीयम्। भगवतो रुक्मिणीजानेरनुकम्पयाऽस्माकं सर्वाऽपि

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चिन्ता निवर्तिता । इदं पुरोवर्ति भवनं प्रविशत्वार्यपुत्रः । स्वीकरोतु च भगवत्प्रसादरूपमिदं वैभवम् ।

(पटोत्थापनं भवति । पुरतो विशालं भवनम्, मालाभिः पूर्णघटैश्च सज्जितं तद्द्वारं च दृश्यते । सुशीला सजयकारं सुदामानं द्वारं नयति ।)

सुदामा - (प्रवेशोन्मुखः साश्रुवदन उपरि विलोकयन्) ।

पूर्वं किञ्चिन्न खलु भगवन् ! याचितं त्वत्सकाशा-
दद्यत्वेऽस्मि प्रथममिह ते सम्मुखं याचमानः ।
स्वीकुर्वेऽहं प्रणतशिरसा वैभवं त्वत्प्रदत्तं
नैत्तद् भूयान्मम विहतयेऽध्यात्मविद्याधनस्य ॥

(श्रीकृष्णं प्रणमति) ।

(पटाक्षेपो भवति) ।

(न भावादुत्तमं किञ्चिदिति गीतं पुनर्गुञ्जति ।)

कल्याणी देववाणी दिशि दिशि तनुतां ज्ञानविज्ञानसारं
विश्वस्मिन्नत्र विश्वेऽर्जितदृढगरिमा वर्धतामार्यधर्मः ।
आर्षैर्दिव्यप्रबोधैर्जगति सुचरितालोकमुद्दीपयन्ती
सद्बुद्धिर्मानवीया क्षितितलमखिलं श्रेयसाऽलङ्करोतु ॥
ये वैभवास्पदतया धनिका लसन्ति
ते सन्तु दुःखिषु सदा दययार्द्रचित्ताः ।
सङ्घर्षभावमतिगम्य समन्वयेन
शान्त्या विकासपदमेतु मनुष्यलोकः ॥

तृतीयोऽङ्कः समाप्तः

समाप्तमिदं नाटकम् ।

•••

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जयतु संस्कृतम् संस्थायाः प्रकाशनानि

१. मङ्गलग्रहः (काव्यम्) - डा. टीकारामः पन्थी
२. कृष्णाभिसर्पणम् (काव्यम्) - महाकविः भरतराजः मन्थलीयः
३. मीमांसातर्कभाषा - डा. काशीनाथः न्यौपाने
४. चन्द्रप्रभा (काव्यम्) - डा. टीकारामः अधिकारी
५. संस्कृतकवितासङ्ग्रहः (प्रथमपुष्पम्) - संयुक्तसम्पादनम्
६. कलमाक्षरचरितकाव्यम् - प्रा. तेजः केशरी शर्मा
७. संस्कृतमा के छ ? - अनुसन्धानात्मकलेखसङ्ग्रहः
८ जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
९. प्राकृतपोखरा (संस्कृते) - अनुवादकः डा. लक्ष्मीकान्तः पन्थी
१०. लङ्कावतारसूत्रम् - अनु.डा. काशीनाथः न्यौपाने
११. चार्वाकदर्शनम् - प्रा. रेवतीरमणः खनालः
१२. गौतमन्यायसूत्रम् - अनु.प्रा. पद्मप्रसादः भट्टराई
१३. ब्रह्मसूत्रम् - अनु.प्रा.डा. दीर्घराजः घिमिरे
१४. जयतु संस्कृतम् (मुखपत्रम्) - संयुक्तसम्पादनम्
१५. संस्कृतकवितासङ्ग्रहः (द्वितीयपुष्पम्) - संयुक्तसम्पादनम्
१६. कामकलाविलास - प्रा. विद्यानाथ-उपाध्यायः
१७. जैनदर्शनं - तत्त्वार्थसूत्रम् - डा. चन्द्रमणिनेपालः
१८. दर्शनसारामृतम् - लोकनाथलुईंटेलः
१९. मीमांसापरिभाषा - प्रा.डा. ऋषिरामपोखरेलः
२०. समीक्षात्मकग्रन्थ - ध्रुवभट्टराई
२१. ब्रह्माण्डपुराण - डा. बद्रीपोखेलः
२२. नेपालगौरवम् (महाकाव्यम्) - प्रा.डा. विष्णुप्रसादः देवकोटा
२३. संस्कृतकाव्यसिद्धान्त समीक्षा - डा. नवराज कट्टेल
२४. कर्मफलम् (संस्कृतरूपकसङ्ग्रहः) - प्रा.डा. नवराजकट्टेलः
२५. कवि पण्डित गायत्री गणेशप्रसाद अर्यालका ... - प्रा.डा. नवराज कट्टेल
२६. आचारिकं नाटकम् - प्रा. रामहरिदाहालः
२७. गुरुकुलचर्यम् - प्रा. रामहरिदाहालः
२८. सत्प्रभवं नाटकम् - प्रा. रामहरिदाहालः
२९. दृष्टिसृष्टिनाटकम् - प्रा. रामहरिदाहालः
३०. नेपालमाता (नाटकम्) - नारायणदत्तशास्त्री
३१. मित्रसङ्गमम् नाटकम् - आचार्यः खेमराजकेशवशरणः
३२. कृष्णागारोज्जीवनम् नाटकम् - प्रा.डा. विष्णुप्रसादः देवकोटा
३३. मातृशतकम् (शोककाव्यम्) - प्रा.डा. नवराजकट्टेलः
३४. पृथ्वीशतकम् (खण्डकाव्यम्) - प्रा.डा. नवराजकट्टेलः
३५. संस्कृतनाटिकाकौस्तुभः (लघुरूपकसंग्रहः) - सम्पा. प्रा.डा. विष्णुप्रसादः देवकोटा

ISBN 978-9937-9902-3-3
9 789937 990233